# Ekāgni-Kāṇḍa

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 1

[[1-1]]

प्र॒सु॒ग्मन्ता॑ धि॒यसा॒नस्य॑ स॒क्षणि॑ व॒रेभि॑र्व॒राꣳ अ॒भिषु॒प्रसी॑दत।
अ॒स्माक॒मिन्द्र॑ उ॒भयं॑ जुजोषति॒ यथ्सौ॒म्यस्यान्ध॑सो॒ बुबो॑धति।
अ॒नृ॒क्ष॒रा ऋ॒जव॑स्सन्तु॒ पन्था॒ येभि॒स्सखा॑यो॒ यन्ति॑ नो व॒रेयम्।
सम॑र्य॒मा सं भगो॑ नो निनीया॒थ्सं जा᳚स्प॒त्यꣳ सु॒यम॑मस्तु देवाः।
अभ्रा॑तृघ्नी॒ व॒रुणाप॑तिघ्नीं बृहस्पते।
इन्द्रापु॑त्रघ्नीं ल॒क्ष्म्यं॑ ता॒मस्यै स॑वितस्सुव।
अघो॑रचक्षु॒रप॑तिघ्न्ये॑धि शि॒वा प॒तिभ्य॑स्सु॒मना᳚स्सु॒वर्चाः᳚।
जी॒व॒सूर्दे॒वका॑मा स्यो॒ना शं नो॑ भव द्वि॒पदे॒ शं चतु॑ष्पदे।
इ॒दम॒हं या त्वयि॑ पति॒घ्न्य॑ल॒क्ष्मिस्तां निर्दि॑शामि।
जी॒वाꣳ रु॑दन्ति॒ विम॑यन्ते अध्व॒रे दी॒र्घामनु॒ प्रसि॑तिं दीधियु॒र्नरः॑।
वा॒मं पि॒तृभ्यो॒ य इ॒दꣳ स॑मेरि॒रे मय॒ः पति॑भ्यो॒ जन॑यः परि॒ष्वजे᳚।
व्यु॑क्षत्क्रू॒रमुद॑च॒न्त्वाप॒ आऽस्यै ब्रा᳚ह्म॒णास्स्नप॑नꣳ हरन्तु।
अवी॑रघ्नी॒रुद॑च॒न्त्वाप॑ः।
अ॒र्य॒म्णो अ॒ग्निं परि॑ यन्तु क्षि॒प्रं प्रती᳚क्षन्ता॒ꣳ॒ श्वश्रवो॑ दे॒वरा᳚श्च।
खेऽनस॒ः खे रथ॒ः खे युग॑स्य शचीपते।
अ॒पा॒लामि॑न्द्र॒ त्रिः पू॒त्व्य᳚कर॒थ्सूर्य᳚वर्च॑सम्।
शं ते॒ हिर॑ण्य॒ꣳ॒ शमु॑ स॒न्त्वाप॒श्शं ते॑ मे॒धी भ॑वतु॒ शं यु॒गस्य॒ तृद्म॑।
शं त॒ आप॑श्श॒तप॑वित्रा भव॒न्त्वथा॒ पत्या॑ त॒न्व॑ꣳ सꣳ सृ॑जस्व॥ १॥
दी॒धि॒यु॒र्नरो॒ऽष्टौ च॑॥ १॥

((pra̱su̱gmanta̍ dhi̱yasā̱nasya̍ sa̱kṣa̱ṇi̍ va̱rebhi̍rva̱rām̐ a̱bhiṣu̱prasī̍data |

a̱smāka̱mindra̍ u̱bhaya̍ṁ jujoṣati̱ yathsau̱myasyāndha̍so̱ bubo̍dhati |
a̱nṛ̱kṣa̱rā ṛ̱java̍ssantu̱ panthā̱ yebhi̱ssakhā̍yo̱ yanti̍ no vare̱yam |
samarya̱mā saṃ bhago̍ no ninīyā̱thsaṃ jā̎spa̱tyaṁ su̱yama̍mastu devāḥ |
abhrā̍tṛghnīṃ varu̱ṇāpa̍tighnīṃ bṛhaspate |
indrāpu̍traghnīṃ la̱kṣmyaṁ tāma̱syai sa̍vitassuva |
agho̍racakṣu̱rapa̍tighnyedhi śi̱vā pa̱tibhya̍ssu̱manā̎ssu̱varcā̎ḥ |
jī̱va̱sūrde̱vakā̍mā syo̱nā śaṃ no̍ bhava dvi̱pade̱ śaṃ catu̍ṣpade |
i̱dama̱haṃ yā tvayi̍ pati̱ghnya̍la̱kṣmistāṃ nirdi̍śāmi |
jī̱vāṁ̍rudanti̱ vima̍yante adhva̱re dī̱rghāmanu̱ prasi̍tiṃ dīdhiyu̱rnara̍ḥ |
vāmaṃ pi̱tṛbhyo̱ ya i̱daṁ sa̍meri̱ re maya̱ḥ pati̍bhyo̱ jana̍yaḥ pari̱ṣvaje̎ |
vyu̍kṣatkrū̱ramuda̍ca̱ntvāpa̱ ā'syai brā̎hma̱ṇāssnapa̍naṁ harantu |
avī̍raghnīruda̍ca̱ntvāpa̍ḥ |
a̱rya̱mṇo a̱gniṃ pari̍ yantu kṣi̱praṃ pratī̎kṣantā̱ṁ śvaśravo̍ de̱varā̎śca |
khe'nasa̱ḥ khe ratha̱ḥ khe yuga̍sya śacīpate |
a̱pā̱lāmi̍ndra̱ triḥ pū̱rtvya̍kara̱thsūrya̍varcasam |
śaṃ te̱ hira̍ṇya̱ṁ̎śamu̍ sa̱ntvāpa̱śśaṃ te̍ me̱dhī bha̍vatu̱ śaṃ yu̱gasya̱ tṛdma̍ |
śaṃ ta̱ āpa̍śśa̱tapa̍vitrā bhava̱ntvathā̱ patya̍ ta̱nva̍ṁ saṁ sṛ̍jasva || 1 ||
dī̱dhi̱yu̱rnaro̱'ṣṭau ca̍ || 1 ||))

[[1-2]]

हिर॑ण्यवर्णा॒श्शुच॑यः पाव॒काः प्रच॑क्रमुर् हि॒त्वाऽव॒द्यमाप॑ः।
श॒तं प॒वित्रा॒ वित॑ता॒ ह्या॑सु॒ ताभि॑ष्ट्वा दे॒वस्स॑वि॒ता पु॑नातु।
हिर॑ण्यवर्णा॒श्शुच॑यः पाव॒का यासु॑ जा॒तः क॒श्यपो॒ यास्व॒ग्निः।
या अ॒ग्निं गर्भ॑ं द॒धिरे सु॒वर्णा॒स्तास्त॒ आप॒श्शꣳ स्यो॒ना भ॑वन्तु।
यासा॒ꣳ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते अ॑व॒पश्य॒ञ्जना॑नाम्।
या अ॒ग्निं गर्भ॑ं द॒धिरे सु॒वर्णा॒स्तास्त॒ आप॒श्शꣳ स्यो॒ना भ॑वन्तु।
यासा॑ं दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे ब॒हुधा॒ निवि॑ष्टाः।
या अ॒ग्निं गर्भ॑ं द॒धिरे सु॒वर्णा॒स्तास्त॒ आप॒श्शꣳ स्यो॒ना भ॑वन्तु।
शि॒वेन॑ त्वा॒ चक्षु॑षा पश्यन्त्वापश्शि॒वया॑ त॒न्वोप॑स्पृशन्तु॒ त्वच॑ं ते।
घृ॒त॒श्चु॒त॒श्शुच॑यो॒ याः पा॑व॒कास्तास्त॒ आप॒श्शꣳ स्यो॒ना भ॑वन्तु।
परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वत॑ः।
वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः।
आ॒शा॒सा॒नेत्ये॑षा।
पू॒षा त्वे॒तो न॑यतु हस्त॒गृह्या॒श्विना॑ त्वा॒ प्रव॑हता॒ꣳ रथे॑न।
गृ॒हान्ग॑च्छ गृ॒हप॑त्नी॒ यथाऽसो॑ व॒शिनी॒ त्वं वि॒दथ॒माव॑दासि॥ २॥
भ॒व॒न्तु॒ पञ्च॑ च॥ २॥

((hira̍ṇyavarṇā̱śśuca̍yaḥ pāva̱kāḥ praca̍kramur hi̱tvā'va̱dyamāpa̍ḥ |
śa̱taṃ pa̱vitrā̱ vita̍tā̱ hya̍su̱ tābhi̍ṣṭvā de̱vassa̍vi̱tā pu̍nātu |
hira̍ṇyavarṇā̱śśuca̍yaḥ pāva̱kā yāsu̍ jā̱taḥ ka̱śyapo̱ yāsva̱gniḥ |
yā a̱gniṃ garbha̍ṃ dadhi̱re su̱varṇā̱stāsta̱ āpa̱śśa̍ṃ syo̱nā bha̍vantu |
yāsā̱ṃ rājā̱ varu̍ṇo̱ yāti̱ madhye̍ satyānṛ̱te a̍vapa̱śyañjanā̍nām |
yā a̱gniṃ garbha̍ṃ dadhi̱re su̱varṇā̱stāsta̱ āpa̱śśa̍ṃ syo̱nā bha̍vantu |
yāsā̍ṃ de̱vā di̱vi kṛ̱ṇvanti̍ bha̱kṣaṃ yā a̱ntari̍kṣe bahu̱dhā nivi̍ṣṭāḥ |
yā a̱gniṃ garbha̍ṃ dadhi̱re su̱varṇā̱stāsta̱ āpa̱śśa̍ṃ syo̱nā bha̍vantu |
śive̍na tvā̱ cakṣu̍ṣā paśyantvāpaśśi̱vayā̍ ta̱nvopa̍spṛśantu̱ tvaca̍ṃ te |
ghṛ̱ta̱ścuta̱śśuca̍yo̱ yāḥ pā̍va̱kāstāsta̱ āpa̱śśa̍ṃ syo̱nā bha̍vantu |
pari̍ tvā girva̱ṇo̱ gira̍ i̱mā bha̍vantu vi̱śvata̍ḥ |
vṛ̱ddhāyu̱manu̱ vṛddha̍yo̱ juṣṭā̍ bhavantu̱ juṣṭa̍yaḥ |
ā̱śāsā̱netye̱ṣā |
pū̱ṣā tve̱to na̍yatu̱ hasta̱gṛhyā̱śvinau̍ tvā prava̍hatā̱ṃ rathe̍na |
gṛ̱hāngaccha gṛ̱hapa̍tnī̱ yathā'so̍ va̱śinī̱ tvaṃ vi̱datha̱māva̍dāsi || 2 ||
bha̱va̱ntu̱ pañca̍ ca || 2 ||))

[[1-3]]

सोम॑ः प्रथ॒मो वि॑विदे गन्ध॒र्वो वि॑विद॒ उत्त॑रः।
तृ॒तीयो॑ अ॒ग्निष्टे॒ पति॑स्तु॒रीय॑स्ते मनुष्य॒जाः।
सोमो॑ऽदद्गन्ध॒र्वाय॑ गन्ध॒र्वो॑ऽद॑दद॒ग्नये॑।
र॒यिं च॑ पु॒त्रांश्चा॑दाद॒ग्निर्म॑ह्य॒मथो॑ इ॒माम्।
गृ॒भ्णामि॑ ते सुप्रजा॒स्त्वाय॒ हस्तं॒ मया॒ पत्या॒ ज॒रद॑ष्टि॒र्यथाऽस॑ः।
भगो॑ अ॒र्यमा स॑वि॒ता पुर॑न्धि॒र्मह्यं॑ त्वाऽदु॒र्गार्ह॑पत्याय दे॒वाः।
ते ह॒ पूर्वे॒ जना॑सो॒ यत्र॑ पूर्व॒वहो॑ हि॒ताः।
मू॒र्धन्वान्॒ यत्र॑ सौभ्र॒वः पूर्वो॑ दे॒वेभ्य॒ आत॑पत्।
सर॑स्वति॒ प्रेदम॑व॒ सुभ॑गे॒ वाजि॑नीवति।
तां त्वा॒ विश्व॑स्य भू॒तस्य॑ प्र॒गाया॑मस्यग्र॒तः।
य एति॑ प्र॒दिश॒स्सर्वा॒ दिशोऽनु॒ पव॑मानः।
हिर॑ण्यहस्त ऐर॑मस्स त्वा॒ मन्म॑नसं कृणोतु।
एक॑मि॒षे विष्णु॒स्त्वाऽन्वे॑तु॒ द्वे ऊ॒र्जे त्रीणि॑ व्र॒ताय॑ च॒त्वारि॒ मायो॑भवाय॒ पञ्च॑ प॒शुभ्य॒ष्षडृ॒तुभ्य॑स्स॒प्त स॒प्तभ्यो॒ होत्रा॑भ्यो॒ विष्णु॒स्त्वाऽन्वे॑तु।
सखा॑ स॒प्तप॑दा भव॒ सखा॑यौ स॒प्तप॑दा बभूव स॒ख्यं ते॑ गमेयꣳ स॒ख्यात्ते॒ मा योषꣳ स॒ख्यान्मे॒ मा योष्ठा॒स्सम॑याव॒ संक॑ल्पावहै॒ संप्रि॑यौ रोचि॒ष्णू सु॑मन॒स्यमा॑नौ।

इ॒षमूर्ज॑म॒भि सं॒वसा॑नौ॒ सं नौ॒ मना॑ꣳसि॒ सं व्र॒ता समु॑ चि॒त्तान्याक॑रम्।
सा त्वम॒स्यमू॒हम॑मू॒हम॑स्मि॒ सा त्वं द्यौर॒हं पृ॑थि॒वी त्वꣳ रेतो॒ऽहꣳ रे॑तो॒भृत्त्वं मनो॒ऽहम॑स्मि॒ वाक्त्वꣳ
सामा॒हम॒स्म्यृ॑क्त्व॒ꣳ सा माम॑नु॒व्रता भव पु॒ꣳसे पु॒त्राय॒ वेत्त॑वै श्रि॒यै पु॒त्राय॒ वेत्त॑व॒ एहि॑ सूनृते॥ ३॥
अ॒ग्र॒तष्षट्च॑॥ ३॥

((soma̍ḥ pratha̱mo vi̍vide gandha̱rvo vi̍vida̱ utta̍raḥ |
tṛ̱tīyo̍ a̱gniṣṭe̱ pati̍stu̱rīya̍ste manu̱ṣya̱jāḥ |
somo̍'dadadgandha̱rvāya̍ gandha̱rvo'da̍dada̱gnaye᳚ |
ra̱yiṃ ca̍ pu̱trāgͫścā̍dāda̱gnirmahya̱matho̍ i̱mām |
gṛ̱bhṇāmi̍ te suprajā̱stvāya̱ hasta̱ṃ mayā̱ patyā̎ ja̱radā̎ṣṭi̱ryathā'sa̍ḥ |
bhago̍ arya̱mā sa̍vi̱tā pura̍ndhi̱rmahya̱ṃ tvā'du̱rgārha̍patyāya de̱vāḥ |
te ha̱ pūrve̱ janā̎so̱ yatra̍ pūrva̱vaho̍ hi̱tāḥ |
mū̱rdha̱nvān yatra̍ saubhra̱vaḥ pūrvo̍ de̱vebhya̱ āta̍pat |
sara̍svati̱ preda̍mava̱ subha̍ge̱ vāji̍nīvati |
tāṃ tvā̱ viśva̍sya bhū̱tasya̍ pra̱gāyā̍masyagra̱taḥ |
ya eti̍ pra̱diśa̱ssarvā̱ diśo'nu̱ pava̍mānaḥ |
hira̍ṇyahasta aira̱mmassa tvā̱ manma̍nasaṃ kṛṇotu |
eka̍mi̱ṣe viṣṇu̱stvā'nve̍tu̱ dve ūrje trīṇi̍ vra̱tāya̍ ca̱tvāri̱ māyo̍bhavāya̱ pañca̍
pa̱śubhya̱ṣṣaḍṛ̱tubhya̍ssa̱pta sa̱ptabhyo̱ hotrā᳚bhyo̱ viṣṇu̱stvā'nve̍tu |
sakhā̍ sa̱ptapa̍dā bhava̱ sakhā̍yau sa̱ptapa̍dā babhūva sa̱khyaṃ te̍ gameyagͫ
sa̱khyātte̱ mā yo̍ṣagͫ sa̱khyānme̱ mā yo᳚ṣṭhā̱ssama̍yāva̱ saṃka̍lpāvahai̱ saṃpri̍yau
roci̱ṣṇū su̍mana̱syamā̍nau |
i̱ṣamūrja̍ma̱bhi sa̱ṃvasā̍nau̱ saṃ nau̱ manā̎gͫsi̱ saṃ vra̱tā samu̍ ci̱ttānyākā̍ram |
sā tvama̱syamū̱hama̍mū̱hama̍smi̱ sā tvaṃ dyaura̱haṃ pṛ̍thi̱vī tvagͫ reto̱'hagͫ
re̍to̱bhṛttvaṃ mano̱'hama̍smi̱ vāktvagͫ sāmā̱hama̱smyṛ̍ktva̱gͫ sā māmanu̍vratā bhava
pu̱gͫse pu̱trāya̱ vetta̍vai śri̱yai pu̱trāya̱ vetta̍va̱ ehi̍ sūnṛte || 3 ||
a̱gra̱ta̱ṣṣaṭca̍ || 3 ||))

[[1-4]]
सोमा॑य जनि॒विदे॒ स्वाहा॑ ग॒न्धर्वा॑य जनि॒विदे॒ स्वाहा॒ऽग्नये॑ जनि॒विदे॒ स्वाहा᳚।
क॒न्य॒ला पि॒तृभ्यो॑ य॒ती प॑तिलो॒कमव॑ दी॒क्षाम॑दास्थ॒ स्वाहा᳚।
प्रेतो॑ मु॒ञ्चाति॒ नामुत॑स्सुब॒द्धाम॒मुत॑स्करत्।
यथे॒यमि॑न्द्र मीढ्वस्सुपु॒त्रा सु॒भगाऽस॑ति।
इ॒मां त्वमि॑न्द्र मीढ्वस्सपु॒त्राꣳ सु॒भगां᳚ कृणु।
दशा᳚स्यां पु॒त्राना धे॑हि॒ पति॑मेकाद॒शं कृ॑धि।
अ॒ग्निरै॑तु प्रथ॒मो दे॒वता॑ना॒ꣳ सो᳚ऽस्यै प्र॒जां मु॑ञ्चतु मृत्युपा॒शात्।
तद॒यꣳ राजा॒ वरु॒णोऽनु॑मन्यतां॒ यथे॒यꣳ स्त्री पौत्र॒मघं न रोदा॑त्।
इ॒माम॒ग्निस्त्रा॑यतां॒ गार्ह॑पत्यः प्र॒जाम॑स्यै नयतु दी॒र्घमायुः॑।

अशू᳚न्योपस्था॒ जीव॑तामस्तु मा॒ता पौत्र॑मान॒न्दम॒भि प्रबु॑ध्यतामि॒यम्।
मा ते॑ गृ॒हे नि॒शि घोष॒ उत्था॑द॒न्यत्र॑ त्वद्रु॑द॒त्य॑स्संवि॑शन्तु।
मा त्वं वि॑के॒श्युर॒ आव॑धिष्ठा जीवप॑त्नी पतिलो॒के विरा॑ज॒ पश्य॑न्ती प्र॒जाꣳ सुम॑न॒स्यमा॑नाम्।
द्यौस्ते॑ पृ॒ष्ठꣳ र॑क्षतु वा॒युरू॒रू अ॒श्विनौ॑ च॒ स्तन॒ं धय॑न्तꣳ सवि॒ताऽभि र॑क्षतु।
आवास॑सः परि॒धाना॒द्बृह॒स्पति॒र्विश्वे॑ दे॒वा अ॒भि र॑क्षन्तु प॒श्चात्।
अ॒प्र॒ज॒स्तां पौ॑त्रमृ॒त्युं पा॒प्मान॑मु॒त वा॒ऽघम्।
शी॒र्ष्णस्स्रज॑मिवो॒न्मुच्य॑ द्वि॒षद्भ्यः॒ प्रति॑ मुञ्चा॒मि॒ पाश᳚म्।
इ॒मं मे॑ वरुण॒ तत्त्वा॑ या॒मि त्वं नो॑ अग्ने॒ स त्वं नो॑ अग्ने॒ त्वम॑ग्ने अ॒याऽस्य॒या सन्मन॑सा हि॒तः।
अ॒या सन् ह॒व्यमू॑हि॒षेऽया नो॑ धेहि भे॒षजम्॥ ४॥
इ॒यम॒ष्टौ च॑॥ ४॥

((somā́ya janivide̱ svāhā́ gandha̱rvāyá ja̱nivide̱ svāhā̱'gnayé ja̱nivide̱ svāhā̎ |
ka̱nya̱lā pi̱tṛbhyó ya̱tī pátilo̱kamavá dī̱kṣāmádāstha̱ svāhā̎ |
preto mu̱ñcāti̱ nāmutássuba̱ddhāma̱mutáskarat |
yathe̱yamíndra mī̱ḍhvassupu̱trā su̱bhagā'sáti |
i̱mām̱ tvamíndra mī̱ḍhvassapu̱trām̐ su̱bhagām̐ kṛ̱ṇu |
daśā̎syām̱ pu̱trānādhéhi̱ patímekāda̱śam̱ kṛ́dhi |
a̱gniraítu pratẖamo de̱vatánā̱m̐ sȍ'syai pra̱jām̱ múñcatu mṛtyupā̱śāt |
tada̱yam̐ rājā̱ varu̱ṇo'númanyatām̱ yathe̱yam̐̎ strī pautráma̱gham̱ na rodā̎t |
i̱māmagnistrā́yatām̱ gārhápatyaḥ pra̱jāmásyai nayatu dī̱rghamāyúḥ |
aśū̎nyopasthā̱ jī̱vátāmastu mā̱tā pautrámāna̱ndama̱bhi prabúdhyatāmi̱yam |
mā té gṛ̱he ni̱śi ghoṣa̱ utthā́da̱nyatra̱ tvadrúda̱tyássam̱viśantu |
mā tvam̱ víke̱śyura̱ āvadhíṣṭhā jī̱vapátnī patilo̱ke virā́ja̱ paśyántī pra̱jām̐
súmana̱syamánām |
dyausté pṛ̱ṣṭham̐ rákṣatu vā̱yurū̱rū a̱śvinaú ca̱ stanam̱ dhayántam̐ savi̱tā'bhi rákṣatu |
āvāsásaḥ pari̱dhānā̱dbṛha̱spati̱rviśvé de̱vā a̱bhi rákṣantu pa̱ścāt |
a̱pra̱ja̱stām̱ paútramṛ̱tyum̱ pā̱pmānámuta vā̱'gham |
śī̱rṣṇassrajámivo̱nmucyá dvi̱ṣadbhya̱ḥ pratí muñcāmi̱ pāśā̎m |
i̱mam̱ mé varu̱ṇa tattvá yāmi̱ tvam̱ nó agne̱ sa tvam̱ nó agne̱ tvamágne a̱yā'sya̱yā
sanmanásā hi̱taḥ |
a̱yā san ha̱vyamúhiṣe̱'yā nó dhehi bheṣa̱jam || 4 ||
i̱yama̱ṣṭau cá || 4 ||))

[[1-5]]
आ ति॑ष्ठे॒मम॒श्मान॒मश्मे॑व॒ त्वꣳ स्थि॒रा भ॑व।
अ॒भि ति॑ष्ठ पृतन्य॒तस्सह॑स्व पृतना॒यतः।
इ॒यं ना॒र्युप॑ ब्रू॒ते कल्पा᳚न्यावपन्ति॒का।

दीर्घायुरस्तु मे पतिर्जीवातु शरदश्शतम्।
तुभ्यमग्रे पर्यवहन्थ्सूर्यां वहतुना सह।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह।
पुनः पत्नीमग्निरदादायुषा सह वर्चसा।
दीर्घायुरस्या यः पतिस्स एतु शरदश्शतम्।
विश्वा उत त्वया वयं धारा उदन्या इव।
अतिगाहेमहि द्विषः।
आ तिष्ठेममश्मानम्।
अर्यमणं नु देवं कन्या अग्निमयक्षत।
स इमां देवो अध्वरः प्रेतो मुञ्चाति नामुतस्सुबद्धाममुतस्करत्।
तुभ्यमग्रे पर्यवहन्पुनः पत्नीमग्निरदाद्विश्वा उत त्वया वय मा तिष्ठेममश्मानम्।
त्वमर्यमा भवसि यत्कनीनां नाम स्वधावथ्स्वर्यं बिभर्षि।
अञ्जन्ति वृक्षꣳ सुधितं न गोभिर्यद्दम्पती समनसा कृणोषि।
तुभ्यमग्रे पर्यवहन्पुनः पत्नीमग्निरदाद्विश्वा उत त्वया वयम्।
प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाऽबध्नाथ्सविता सुकेतः।
धातुश्च योनौ सुकृतस्य लोके स्योनं ते सह पत्या करोमि।
इमं विष्यामि वरुणस्य पाशं यमबध्नीत सविता सुशेवः।
धातुश्च योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या कृणोमि।
अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि।
अयसा मनसा धृतोऽयसा हव्यमूहिषेऽया नो धेहि भेषजम्॥ ५॥
द्विषस्सुशेवस्त्रीणि च॥ ५॥

((ā ti̍ṣṭhe̱mamaśma̍na̱maśme̍va̱ tvam̐̐ sthi̱rā bha̍va |
a̱bhi ti̍ṣṭha pṛtanya̱tassaha̍sva pṛtanāya̱taḥ |
i̱yaṃ nā̱ryupa̍ brūte̱ kalpā̱̍nyāvapanti̱kā |
dī̱rghā̱yura̍stu me̱ pati̱rjīva̍tu śa̱rada̍śśa̱tam |
tubhya̱magre̱ parya̍vahanthsūryāṃ va̍ha̱tunā̍ sa̱ha |
puna̱ḥ pati̍bhyo jā̱yāṃ dā a̍gne pra̱jayā̍ sa̱ha |
puna̱ḥ patnī̍ma̱gnira̍dā̱dāyu̍ṣā sa̱ha varca̍sā |
dī̱rghā̱yura̍syā̱ yaḥ pati̱ssa e̍tu śa̱rada̍śśa̱tam |
viśvā̍ u̱ta tvayā̍ va̱yaṃ dhārā̍ uda̱nyā̍ iva |
ati̍gāhemahi̱ dviṣa̍ḥ |
ā ti̍ṣṭhe̱mamaśmā̍nam |
a̱rya̱maṇa̱ṃ nu de̱vaṃ ka̱nyā̍ a̱gnima̍yakṣata |

sa i̱māṃ de̱vo a̍dhva̱raḥ preto muñcāti̱ nāmuta̍ssuba̱ddhāma̱mutaskarat ।
tubhya̱magre̱ parya̍vaha̱npuna̱ḥ patni̍ma̱gnira̍dā̱dviśva̍ u̱ta tvaya̍ va̱ya mā
ti̍ṣṭhe̱mamaśma̍nam ।
tvama̍rya̱mā bha̍vasi̱ yatka̱nīnā̱ṃ nāma̍ sva̱dhāva̱thsva̍ryam bi̱bharṣi̍ ।
a̱ñjanti̍ vṛ̱kṣam̐ sudhi̍ta̱m na gobhi̱ryaddampa̍tī̱ sama̍nasā kṛ̱ṇoṣi̍ ।
tubhya̱magre̱ parya̍vaha̱npuna̱ḥ patni̍ma̱gnira̍dā̱dviśva̍ u̱ta tvaya̍ va̱yam ।
pra tva̍ muñcāmi̱ varu̍ṇasya̱ pāśā̱dyena̱ tvā'ba̍dhnāthsavi̱tā su̱keta̍ḥ ।
dhā̱tuśca̱ yonau̍ sukṛ̱tasya̍ lo̱ke syo̱naṃ te̍ sa̱ha patya̍ karomi ।
i̱maṃ vi̱ṣyā̍mi̱ varu̍ṇasya̱ pāśa̱ṃ yamaba̍dhnīta savi̱tā su̱śeva̍ḥ ।
dhā̱tuśca̱ yonau̍ sukṛ̱tasya̍ lo̱ke'ri̍ṣṭā̱ṃ tvā sa̱ha patya̍ kṛ̱ṇomi ।
a̱yāśca̱gne'sya̍nabhi̍śa̱stīśca̍ sa̱tyamittvama̱yā a̍si ।
aya̍sā̱ mana̍sā dhṛ̱to̍'yasa̍ ha̱vyamū̍hiṣe̱'yā no̍ dhehi bheṣa̱jam ॥ 5 ॥
dvi̱ṣa̍ssu̱śeva̱strīṇi̍ ca ॥ 5 ॥))

[[1-6]]

स॒त्येनोत्त॑भिता॒ भूमि॒स्सूर्ये॒णोत्त॑भिता॒ द्यौः।
ऋ॒तेना॑दि॒त्यास्ति॑ष्ठन्ति दि॒वि सोमो॒ अधि॑ श्रि॒तः।
यु॒ञ्जन्ति॑ ब्र॒ध्नं योगे॑योगे।
सु॒कि॒ꣳ॒शु॒कꣳ शा॑ल्म॒लिं वि॒श्वरू॑प॒ꣳ॒ हिर॑ण्यवर्णꣳ सु॒वृतꣳ॑ सु॒च॒क्रम्।
आरो॑ह वध्व॒मृत॑स्य लो॒कꣳ॒ स्यो॒नं पत्ये॑ व॒हतुं॑ कृणुष्व।
उदु॑त्त॒रमा॒रोह॑न्ती व्य॒स्यन्ती॑ पृत॒न्यतः।
मू॒र्धानं॒ पत्यु॒रारो॑ह प्र॒जया॑ च वि॒राड्भ॑व।
सं॒राज्ञी॒ श्वशु॑रे भव सं॒राज्ञी॑ श्वश्रु॒वां भ॑व।
नना॑न्दरि सं॒राज्ञी॑ भव सं॒राज्ञी॒ अधि॑ दे॒वेषु॑।
स्नु॒षाणा॒ꣳ॒ श्वशु॑राणां प्र॒जाया॑श्च॒ धन॑स्य च।
पती॑नां च दे॒वृणां॑ च सजा॒ताना॑ं वि॒राड्भ॑व।
नी॒ल॒लो॒हि॒ते भ॑वतः कृ॒त्या स॒क्तिर्व्यज्य॑ते।
एध॑न्तेऽस्या ज्ञा॒तयः॒ पति॑र्ब॒न्धेषु॑ बध्यते।
ये व॒ध्वश्च॒न्द्रं व॑ह॒तुं यक्ष्मा॒ यन्ति॒ जना॒ꣳ॒ अनु॑।
पु॒नस्तान्॒ य॒ज्ञिया॑ दे॒वा नय॑न्तु॒ यत॒ आग॑ताः।
मा वि॑दन्परिप॒न्थिनो॒ य आ॒सीद॑न्ति॒ दम्प॑ती।
सु॒गेभि॑र्दु॒र्गमती॑ता॒मप॑द्रा॒न्त्वरा॑तयः।
सु॒गं पन्था॑न॒मारु॑क्षम॒रिष्टꣳ॒ स्व॒स्ति॒वाह॑नम्।
यस्मि॑न्वी॒रो न रिष्य॑त्य॒न्येषां॑ विन्द॒ते वसु॑॥ ६॥

धन॑स्य च॒ नव॑ च॥ ६॥

((sa̱tyenotta̍bhitā̱ bhūmi̱ssūrye̱ṇotta̍bhitā̱ dyauḥ |
ṛ̱tenā̍di̱tyāsti̱ṣṭha̍nti di̱vi somo̱ adhi̍ śri̱taḥ |
yu̱ñjanti̍ bra̱dhnaṃ yoge̍yoge |
su̱ki̱m̐śu̱kam̐ śa̍lma̱liṃ vi̱śvaru̍pa̱m̐ hira̍ṇyavarṇam̐ su̱vṛtam̐ suca̱kram |
āro̍ha vadhva̱mṛta̍sya lo̱kam̐ syo̱naṃ patye̍ vaha̱tuṃ kṛ̍ṇuṣva |
udu̍tta̱ramā̱roha̍ntī vya̱syanti̍ pṛ̱tanya̱taḥ |
mū̱rdhāna̱m patyu̱rāro̍ha pra̱jayā̍ ca vi̱rāḍbha̍va |
sa̱mrājñī̱ śvaśu̍re bhava sa̱mrājñī̍ śvaśru̱vāṃ bha̍va |
nanā̍ndari sa̱mrājñī̍ bhava sa̱mrājñī̱ adhi̍ de̱veṣu̍ |
snu̱ṣāṇā̱m̐ śvaśu̍rāṇāṃ pra̱jāyā̍śca̱ dhana̍sya ca |
pati̍nāṃ ca de̱vṝ̱ṇāṃ ca̍ sa̱jā̱tānā̍m̐ vi̱rāḍbha̍va |
nī̱la̱lo̱hi̱te bha̍vataḥ kṛ̱tyā sa̱ktirvyajya̍te |
edha̍nte'syā jñā̱taya̱ḥ pati̍rba̱ndheṣu̍ badhyate |
ye va̱dhvaśca̱ndraṃ va̍ha̱tuṃ yakṣmā̱ yanti̱ janā̱m̐ anu̍ |
puna̱stān ya̱jñiyā̍ de̱vā naya̍ntu̱ yata̱ āga̍tāḥ |
mā vi̍danparipa̱nthino̱ ya ā̱sīda̍nti̱ dampa̍tī |
su̱gebhi̍rdu̱rgamati̍tā̱mapa̍drā̱ntvarā̍tayaḥ |
su̱gaṃ panthā̍na̱mārū̍kṣa̱mari̍ṣṭa̱m̐ svasti̱vāha̍nam |
yasmi̍nvī̱ro na riṣyā̍tya̱nyeṣā̍m̐ vi̱ndate̱ vasu̍ || 6 ||
dhana̍sya ca̱ nava̍ ca || 6 ||))

[[1-7]]

ता म॑न्दसा॒ना मनु॑षो दु॒रो॒ण आ॒धत्त॒ꣳ र॒यिं द॒शवी॑रं वच॒स्यवे॑।
कृ॒तं ती॒र्थꣳ सु॑प्रपा॒णꣳ शु॑भस्पती स्था॒णुं प॑थे॒ष्ठामप॑ दु॒र्मतिꣳ ह॑तम्।
अ॒यं नो॑ म॒ह्याः पा॒रꣳ॒ स्व॒स्ति नै॑ष॒द्वन॒स्पति॑ः।
सीरा॑ नस्सु॒तरा॑ भव दी॒र्घायु॒त्वाय॒ वर्च॑से।
अ॒स्य पा॒रे नि॑रृ॒तस्य॑ जी॒वा ज्योति॑रशीमहि।
म॒ह्या इ॑न्द्रस्स्व॒स्तये॑।
यदृ॒ते चि॑दभि॒श्रिष॑ः पु॒रा ज॒र्तृभ्य॑ आ॒तृद॑ः।
सन्धा॑ता स॒न्धिं म॒घवा॑ पु॒रो॒वसु॒र्निष्क॑र्ता॒ विह्रु॑तं॒ पुन॑ः।
इडा॑मग्न इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि॒ त्वं नो॑ अ॒ग्ने स त्वं नो॑ अ॒ग्ने त्वम॑ग्ने अ॒याऽसि॑।
ये ग॑न्ध॒र्वा अ॑प्स॒रस॑श्च दे॒वीरे॑षु वृ॒क्षेषु॑ वानस्प॒त्येष्वास॑ते।
शि॒वास्ते अ॒स्यै व॒ध्वै॑ भवन्तु॒ मा हि॒ꣳसिषु॒र्वह॒तुमू॒ह्यमा॑नाम्।
या ओष॑धयो॒ या न॒द्यो॑ यानि॒ धन्वा॑नि॒ ये वना॑।
ते त्वा॑ वधु प्र॒जाव॑तीं॒ प्र त्वे मु॑ञ्च॒न्त्वꣳह॑सः।

संका॑शयामि वह॒तुं ब्रह्म॑णा गृ॒हैरघो॑रेण॒ चक्षु॑षा॒ मैत्रे॑ण।
प॒र्या॑णद्धं वि॒श्वरू॑पं यद॒स्याꣳ स्यो॒नं पति॑भ्यस्सवि॒ता कृ॒णोतु॒ तत्।
आ वा॑मगन्थ्सुम॒तिर्वा॑जिनीवसू॒ न्य॑श्विना हृ॒थ्सु कामाꣳ॑ अयꣳसत।
अभू॑तं गो॒पा मि॑थु॒ना शु॑भस्पती प्रि॒या अ॑र्य॒म्णो दु॒र्याꣳ॑ अशीमहि।
अ॒यं नो॑ दे॒वस्स॑वि॒ता बृ॒हस्पति॒रिन्द्रा॒ग्नी मि॒त्रावरु॑णा स्व॒स्तये॑।
त्वष्टा॒ विष्णुः॑ प्र॒जया॑ सꣳररा॒णः काम॒ आया॑तं॒ कामा॑य त्वा॒ विमु॑ञ्चतु॥ ७॥
आस॑ते॒ नव॑ च॥ ७॥

((tā mándasānā manúṣo duroṇa ādhaṭtamꣳ rayiṃ daśavīram vacasyavë |
kṛtaṃ tīrthamꣳ súprapāṇamꣳ śúbhaspatī sthāṇum pátheṣṭhāmapá durmatimꣳ hátam |
ayaṃ nó mahyāḥ pāramꣳ svasti néṣadvanaspatiḥ |
sīrá nassutará bhava dīrghāyutvāya varcáse |
asya pāre nirṛtasyá jīvā jyotiraśīmahi |
mahyā indrassvastayë |
yadṛte cidabhiśriṣáḥ purā jartṛbhyá ātṛdáḥ |
sandhátā sandhiṃ maghavá purovasurniṣkártā vihṛtaṃ punáḥ |
idámagna imaṃ mé varuṇa tattvá yāmi tvaṃ nó agne sa tvaṃ nó agne tvamágne ayā'si |
ye gándharvā ápsarasáśca devīreṣu vṛkṣeṣú vānaspatyeṣvāsáte |
śivāste asyai vadhvai bhavantu mā himꣳsiṣurvahatumūhyamánām |
yā oṣádhayo yā nadyó yāni dhanváni ye vanā̈ |
te tvá vadhu prajāvátīm pra tve múñcantvamꣳhásaḥ |
saṃkáśayāmi vahatuṃ brahmáṇā gṛhairaghóreṇa cakṣúṣā maitréṇa |
paryāṇáddhaṃ viśvarūpaṃ yadasyāmꣳ syonaṃ patibhyassavitā kṛṇotu tat |
ā vámaganthsumatirvájinīvasū nyáśvinā hṛthsu kāmāmꣳ ayamꣳsata |
abhūtaṃ gopā mithunā śúbhaspatī priyā áryamṇo duryāmꣳ aśīmahi |
ayaṃ nó devassávitā bṛhaspatirindrāgnī mitrāvarúṇā svastayë |
tvaṣṭā viṣṇúḥ prajayá samꣳrarāṇaḥ kāma āyátaṃ kāmáya tvā vimúñcatu || 7 ||
āsáte navá ca || 7 ||))

[[1-8]]
शर्म॒ वर्मे॒दमाह॑रा॒स्यै नार्यै॑ उप॒स्तिरे॑।
सिनी॑वालि॒ प्रजा॑यतामि॒यं भग॑स्य सुम॒ता अ॑सत्।
गृ॒हान्भ॒द्रान्थ्सु॒मन॑सः प्रप॒द्येऽवीर॒घ्नी वी॒रव॑तस्सु॒वीरा॑न्।
इरां॒ वह॑तो घृतमु॒क्षमा॑णा॒स्तेष्व॒हꣳ सुमना॒स्सं वि॑शामि।
आग॑न्गो॒ष्ठं महि॑षी॒ गोभि॒रश्वै॒रायु॑ष्मत्पत्नी प्र॒जया॑ स्व॒र्वित्।
ब॒ह्वीं प्र॒जां ज॒नय॑न्ती सु॒रत्ने॒मम॒ग्निꣳ श॒तहि॑मास्सपर्यात्।

अ॒यम॒ग्निर्गृ॒हप॑तिस्सुस॒ꣳसत्पु॑ष्टि॒वर्ध॑नः।
यथा॒ भग॑स्या॒भ्यां दद॑द्र॒यिं पु॒ष्टिमथो॑ प्र॒जाम्।
प्र॒जया॑ आ॒भ्यां प्रजापत॒ इन्द्रा॑ग्नी॒ शर्म॑ यच्छतम्।
यथैन॑यो॒र्न प्र॑मी॒याता॑ उ॒भयो॒र्जीव॑तोः प्र॒जाः।
तेन॑ भू॒तेन॑ ह॒विषा॒ऽयमाप्या॑यतां॒ पुन॑ः।
जा॒यां याम॑स्मा॒ आवा॑क्षु॒स्ताꣳ रसे॑ना॒भिव॑र्धताम्।
अ॒भिव॑र्धतां॒ पय॑सा॒ऽभि रा॒ष्ट्रेण॑ वर्धताम्।
र॒य्या स॒हस्र॑पोषसे॒मौ स्ता॒मन॑पेक्षितौ।
इ॒हैव स्तं॒ मा वियो॑ष्टं॒ विश्व॒मायु॒र्व्य॑श्नुतम्।
म॒ह्या इन्द्र॑स्स्व॒स्तये॑।
ध्रु॒वैधि॒ पोष्या॒ मयि॒ मह्यं॑ त्वाऽदा॒द्बृ॒हस्पति॑ः।
मया॒ पत्या॑ प्र॒जाव॑ती॒ सं जीव॑ श॒रद॑श्श॒तम्।
त्वष्टा॑ जा॒याम॑जनय॒त्त्वष्टा॑ऽस्यै॒ त्वां पति॑म्।
त्वष्टा॑ स॒हस्र॒मायु॑ꣳषि दी॒र्घमायु॑ः कृणोतु वाम्।
इ॒मं मे॑ वरुण॒ तत्त्वा॑ यामि॒ त्वं नो॑ अग्ने॒ स त्वं नो॑ अग्ने॒ त्वम॑ग्ने अ॒याऽसि॑॥ ८॥
जीव॑तोः प्र॒जा वा॒मेकं॑ च॥ ८॥

((śarma̱ varme̱damāhárā̱syai nāryá upa̱stirë |
sinívālī̱ prajáyatāmi̱yaṃ bhagásya suma̱tā ásat |
gṛ̱hānbha̱drānthsu̱manása̱ḥ prapa̱dye'víraghnī vī̱ravátassu̱vīrān̍ |
irā̱ṃ vaháto ghṛ̱tamu̱kṣamá̱ṇāsteṣva̱ham̐ su̱manā̱ssaṃ viśāmi |
āgángo̱ṣṭhaṃ mahíṣī̱ gobhi̱raśvai̱rāyúṣmatpatnī pra̱jayä́ sva̱rvit |
ba̱hvīṃ pra̱jāṃ ja̱nayántī suratne̱mamagnim̐ śa̱tahímāssaparyāt |
a̱yama̱gnirgṛ̱hapátissusa̱m̐satpúṣṭi̱vardhánaḥ |
yathā̱ bhagásyā̱bhyāṃ dadádra̱yiṃ puṣṭi̱mathö pra̱jām |
pra̱jayá ābhyāṃ prajāpata̱ indrä́gnī̱ śarmá yacchatam |
yathainá yo̱rna prámī̱yātá u̱bhayo̱rjīvátoḥ pra̱jāḥ |
tená bhū̱tená ha̱viṣā̱'yamāpyáyatā̱ṃ punáḥ |
jā̱yāṃ yāmásmā̱ āvä́kṣu̱stām̐ rasénā̱bhivárdhatām |
a̱bhivárdhatā̱ṃ payásā̱'bhi rā̱ṣṭreṇá vardhatām |
ra̱yyā sa̱hasrápoṣase̱mau stā̱manápekṣitau |
i̱haiva sta̱ṃ mā viyöṣṭa̱ṃ viśva̱māyu̱rvyáśnutam |
ma̱hyā índrassva̱stayë |
dhru̱vaidhi pöṣyā̱ mayi̱ mahyaṃ́ tvā'dā̱dbṛ̱haspatíḥ |
mayā̱ patyä́ pra̱jāvátī̱ saṃ jíva śa̱radáśśa̱tam |
tvaṣṭá jā̱yāmájanaya̱ttvaṣṭä́'syai̱ tvāṃ patïm |
tvaṣṭá sa̱hasra̱māyum̐ṣi dī̱rghamāyúḥ kṛ̱ṇotu vām |

i̱maṃ me̍ varu̱ṇa̱ tattvā̍ yāmi̱ tvaṃ no̍ agne̱ sa tvaṃ no̍ agne̱ tvama̍gne a̱yā'si̍ || 8 ||
jīvā̍toḥ pra̱jā vā̱mekaṃ̍ ca || 8 ||))

[[1-9]]
इ॒ह गाव॒ः प्रजा॑यध्वमि॒हाश्वा॑ इ॒ह पूरु॑षाः।
इ॒हो स॒हस्र॑दक्षिणो रा॒यस्पोषो॒ निषी॑दतु।
सोमे॑नादि॒त्या ब॒लिन॒स्सोमे॑न पृथि॒वी दृ॒ढा।
अथो॒ नक्ष॑त्राणामे॒षामु॒पस्थे॒ सोम॒ आधि॑तः।
प्रस्वस्स्थ॒ः प्रेयं प्र॒जया॒ भुव॑ने शोचेष्ट।
इ॒ह प्रि॒यं प्र॒जया॑ ते॒ समृ॑ध्यताम॒स्मिन्गृ॒हे गार्ह॑पत्याय जागृहि।
ए॒ना पत्या॑ त॒न्व॑ꣳ सꣳ सृ॒जस्वाथा॒ जीव्री॑ वि॒दथ॒माव॑दासि।
सु॒म॒ङ्ग॒लीरि॒यं व॒धूरि॒माꣳ समे॑त॒ पश्य॑त।
सौभा॑ग्यम॒स्यै द॒त्वायाथास्तं॑ विप॑रेतन।
ध्रु॒वक्षि॑तिर्ध्रु॒वयो॑निर्ध्रु॒वम॑सि ध्रु॒वत॑स्स्थि॒तम्।
त्वं नक्ष॑त्राणां मे॒थ्यसि॒ स मा॑ पाहि पृतन्य॒तः।
स॒प्त ऋ॒षय॑ः प्रथ॒मां कृत्ति॑कानामरुन्धतीं।
यद्ध्रुवता॒ꣳ ह निन्यु॒ः षट्कृत्ति॑का मुख्ययो॒गं वह॑न्ती॒यम॒स्माक॑मेधत्वष्ट॒मी।
सद॑स॒स्पति॒मद्भु॑तं प्रि॒यमिन्द्र॑स्य॒ काम्य॑म्।
स॒निं मे॒धाम॑यासिषम्।
उद्दी॑प्यस्व जातवेदोऽप॒घ्नन्निरृ॑तिं॒ मम॑।
प॒शूꣳश्च॒ मह्य॒माव॑ह॒ जीव॑नं च॒ दिशो॑ दिश।
मानो॑ हिꣳसीज्जातवेदो॒ गामश्वं॒ पुरु॑षं॒ जग॑त्।
अबि॑भ्र॒दग्न॒ आग॑हि श्रि॒या मा॒ परि॑ पातय॥ ९॥
ध्रु॒वत॑स्स्थि॒तं नव॑ च॥ ९॥

((i̱ha gāva̱ḥ prajā̍yadhvami̱hāśvā̍ i̱ha pūru̍ṣāḥ |
i̱ho sa̱hasra̍dakṣiṇo rā̱yasposo̱ niṣī̍datu |
somē̍nādi̱tyā ba̱lina̱ssome̍na pṛthi̱vī dṛ̱ḍhā |
atho̱ nakṣa̍trāṇāme̱ṣāmu̱pasthe̱ soma̱ ādhi̍taḥ |
prasvassthaḥ̱ preyaṃ pra̱jayā̱ bhuva̍ne śoceṣṭa |
i̱ha pri̱yaṃ pra̱jayā̍ te̱ samṛ̍dhyatāma̱smingṛ̱he gārha̍patyāya jāgṛhi |
e̱nā patyā̍ ta̱nvaṃ̍ saṃ sṛ̱ja̱svāthā̱ jīvrī̍ vi̱datha̱māva̍dāsi |
su̱maṅga̱līri̱yaṃ va̱dhūri̱māṃ sa̍meta̱ paśya̍ta |

saubhāgyamasyai datvāyāthāstaṃ viparetana |
dhruvakṣitirdhruvayonirdhruvamasi dhruvatassthitam |
tvaṃ nakṣatrāṇāṃ methyasi sa mā pāhi pṛtanyataḥ |
sapta ṛṣayaḥ prathamāṃ kṛttikānāmarundhatīṃ |
yaddhruvatāgͫ ha ninyuḥ ṣaṭkṛttikā mukhyayogaṃ
vahantīyamasmākamedhatvaṣṭamī |
sadasaspatimadbhutaṃ priyamindrasya kāmyam |
saniṃ medhāmayāsiṣam |
uddīpyasva jātavedo'paghnannirṛtiṃ mama |
paśūgͫśca mahyamāvaha jīvanaṃ ca diśo diśa |
māno higͫsījjātavedo gāmaśvaṃ puruṣaṃ jagat |
abibhradagna āgahi śriyā mā pari pātaya || 9 ||
dhruvatassthitaṃ nava ca || 9 ||))

[[1-10]]

उदीर्ष्वातो विश्वावसो नमसेडामहे त्वा।
अन्यामिच्छ प्रफर्व्यꣳ सं जायां पत्या सृज।
उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीट्टे।
अन्यामिच्छ पितृषदं व्यक्ताꣳ स ते भागो जनुषा तस्य विद्धि।
अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यैतां कृणोमि स्वाहा।
वायो प्रायश्चित्त आदित्य प्रायश्चित्ते प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा।
प्रसवश्चोपयामश्च काटश्चार्णवश्च धर्णसिश्च द्रविणं च भगश्चान्तरिक्षं च सिन्धुश्च समुद्रश्च सरस्वाꣳश्च विश्वव्यचाश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मस्स्वाहा।
मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मस्स्वाहा।
चित्तं च चित्तिश्चाकूतं चाकूतिश्चाधीतं चाधीतिश्च विज्ञातं च विज्ञानं च नाम च क्रतुश्च दर्शश्च पूर्णमासश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मस्स्वाहा।
भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहोꣳस्वाहा॥ १०॥
उदीर्ष्वातो दर्श॥ १०॥

((udīrṣvāto viśvāvaso namasedāmahe tvā |
anyāmiccha prapharvyagͫ saṃ jāyāṃ patyā sṛja |
udīrṣvātaḥ pativatī hyeṣā viśvāvasuṃ namasā gīrbhirīṭṭe |
anyāmiccha pitṛṣadaṃ vyaktāgͫ sa te bhāgo januṣā tasya viddhi |

agne̎ prāyaścitte̱ tvaṃ de̱vānām̱ prāya̍ścittirasi brāhma̱ṇastva̍ nā̱thakā̍ma̱ḥ prapa̍dye̱
yā'syāṃ pa̍ti̱ghnī ta̱nūḥ pra̍jā̱ghnī pa̍śu̱ghnī la̍kṣmi̱ghnī jā̍ra̱ghnīma̍syai̱tāṃ kṛ̍ṇomi̱
svāhā̎ |
vāyo̎ prāyaścitta̱ āditya prāyaścitte̱ prajā̍pate prāyaścitte̱ tvaṃ de̱vānām̱
prāya̍ścittirasi brāhma̱ṇastva̍ nā̱thakā̍ma̱ḥ prapa̍dye̱ yā'syāṃ pa̍ti̱ghnī ta̱nūḥ
pra̍jā̱ghnī pa̍śu̱ghnī la̍kṣmi̱ghnī jā̍ra̱ghnīma̍syai̱ tāṃ kṛ̍ṇomi̱ svāhā̎ |
pra̱sa̱vaścopa̍yā̱maśca̱ kāṭa̍ścārṇa̱vaśca̍ dharṇa̱siśca̱ dravi̍ṇaṃ ca̱ bhaga̍ścā̱ntari̍kṣaṃ
ca̱ sindhu̍śca samu̱draśca̱ sara̍svāṃ̐śca vi̱śvavya̍cāśca̱ te yaṃ dvi̱ṣmo yaśca̍ no̱ dveṣṭi̱
tame̍ṣām̱ jambhe̍ dadhma̱ssvāhā̎ |
madhu̍śca̱ mādha̍vaśca śu̱kraśca̱ śuci̍śca̱ nabha̍śca nabha̱sya̍ścе̱ṣaścoṟjaśca̱ saha̍śca
saha̱sya̍śca̱ tapa̍śca tapa̱sya̍śca̱ te yaṃ dvi̱ṣmo yaśca̍ no̱ dveṣṭi̱ tame̍ṣām̱ jambhe̍
dadhma̱ssvāhā̎ |
ci̱ttaṃ ca̱ citti̱ścākū̍taṃ̱ cākū̍ti̱ścādhī̍taṃ̱ cādhī̍tiśca̱ vi̱jñā̍taṃ ca vi̱jñāna̍ṃ ca̱ nāma̍ ca̱
kratu̍śca̱ darśa̍śca pūrṇa̱mā̍saśca̱ te yaṃ dvi̱ṣmo yaśca̍ no̱ dveṣṭi̱ tame̍ṣām̱ jambhe̍
dadhma̱ssvāhā̎ |
bhūssvāhā̱ bhuva̱ssvāhā̱ suva̱ssvāhoṃ̐svāhā̎ || 10 ||
u̱dīṟṣvāto̱ daśa̍ || 10 ||))

[[1-11]]

अप॑श्यं त्वा॒ मन॑सा॒ चेकि॑तानं॒ तप॑सो जा॒तं तप॑सो॒ विभू॑तम्।
इ॒ह प्र॒जामि॒ह र॒यिꣳ ररा॑णः प्रजा॑यस्व प्र॒जया॑ पुत्रकाम।
अप॑श्यं त्वा॒ मन॑सा॒ दीध्या॑ना॒ꣳ स्वायां॑ त॒नूꣳ ऋ॒त्विये॒ नाथ॑मानाम्।
उप॒ मामु॒च्चा यु॑व॒तिर्ब॑भू॒याः प्रजा॑यस्व प्र॒जया॑ पुत्रकामे।
सम॑ञ्जन्तु॒ विश्वे॑ दे॒वास्स॒मापो॒ हृद॑यानि नौ।
सं मा॑त॒रिश्वा॒ सं धा॒ता समु॒ देष्ट्री॑ दिदेष्टु नौ।
प्रजा॑पते त॒न्वं॑ मे जुषस्व॒ त्वष्ट॑र्दे॒वेभि॑स्स॒हसाम इन्द्र।
विश्वै॑र्दे॒वै रा॒तिभि॑स्सꣳररा॒णः पु॒ꣳसां ब॑हू॒नां मा॒तर॑स्स्याम।
आ न॑ः प्र॒जां ज॑नयतु प्र॒जाप॑तिराजर॒साय॒ सम॑नक्त्वर्य॒मा।
अदु॑र्मङ्ग॒लीः पतिलो॒कमावि॑श॒ शं नो॑ भव द्वि॒पदे॒ शं चतु॑ष्पदे।
तां पू॑षञ्छि॒वत॑मा॒मेर॑यस्व॒ यस्यां॒ बीजं॑ मनु॒ष्या॑ वप॑न्ति।
या न॑ ऊ॒रू उ॑श॒ती वि॒स्रया॑तै॒ यस्या॑मु॒शन्तः॑ प्र॒हरे॑म॒ शेफ॒᳚म्॥ ११॥
शं चतु॑ष्पदे॒ द्वे च॑॥ ११॥

((apa̍śyaṃ tvā̱ mana̍sā̱ ceki̍tānaṃ̱ tapa̍so jā̱taṃ tapa̍so̱ vibhū̍tam |
i̱ha pra̱jāmi̱ha ra̱yiṃ̐ rarā̍ṇa̱ḥ prajā̍yasva pra̱jayā̍ putrakāma |
apa̍śyaṃ tvā̱ mana̍sā̱ dīdhyā̍nā̱ṃ̐ svāyā̍ṃ̐ ta̱nūṃ̐ ṛ̱tviye̱ nātha̍mānām |
upa̱ māmu̱ccā yu̍va̱tirbabhū̍yā̱ḥ prajā̍yasva pra̱jayā̍ putrakāme |
samañ̍jantu̱ viśve̍ de̱vāssamāpo̱ hṛda̍yāni nau |

saṃ mā̍ta̱riśvā̱ saṃ dhā̱tā samu̱ deṣṭrī̍ dideṣṭu nau |
prajā̍pate ta̱nvaṃ̍ me juṣasva̱ tvaṣṭa̍rde̱vobhi̍ssa̱hasā̱ma i̍ndra |
viśvai̍rde̱vai rā̱tibhi̍ssaṃ̍rarā̱ṇaḥ pu̱ṃ̐sāṃ ba̍hū̱nāṃ mā̱tara̍ssyāma |
ā na̍ḥ pra̱jāṃ ja̍nayatu pra̱jāpa̍tirājara̱sāya̱ sama̍naktvarya̱mā |
adu̍rmaṅgalīḥ patilo̱kamāvi̍śa̱ śaṃ no̍ bhava dvi̱pade̱ śaṃ catu̍ṣpade |
tāṃ pū̍ṣañchi̱vata̍mā̱mera̍yasva̱ yasyā̱ṃ bīja̱ṃ manu̱ṣyā̍ vapa̍nti |
yā na̍ ū̱rū u̍śa̱tī vi̱sraya̍tai̱ yasyā̍mu̱śanta̱ḥ prahare̍ma̱ śephä̍m || 11 ||
śaṃ catu̍ṣpade̱ dve ca̍ || 11 ||))

[[1-12]]

आरो॑हो॒रुमुप॑बर्हस्व बा॒हुं परि॑ष्वजस्व जा॒यां॓ सु॑मन॒स्यमा॑नः।
तस्यां॑ पुष्यतं मिथु॒नौ सयो॑नी ब॒ह्वीं प्र॒जां ज॒नय॑न्तौ॒ सरे॑तसा।
आ॒र्द्रयाऽर॑ण्या॒ यत्राम॑न्थ॒त्पुरु॑षं॒ पुरु॑षेण॒ श॒क्रः।
तदे॒तौ मि॑थु॒नौ सयो॑नी प्र॒जया॒ऽमृते॑ने॒ह ग॑च्छतम्।
अ॒हं गर्भ॒मद॑धा॒मोष॑धीष्व॒हं विश्वे॑षु॒ भुव॑नेष्व॒न्तः।
अ॒हं प्र॒जा अ॑जनयं पि॒तॄणाम॒हं जनि॑भ्यो अप॒रीषु॑ पु॒त्रान्।
पु॒त्रिणे॒मा कु॑मा॒रिणा॒ विश्व॒मायु॒र्व्य॑श्नुतम्।
उ॒भा हिर॑ण्यपेशसा वी॒तिहो॑त्रा कृ॒तद्व॑सू।
द॒श॒स्यन्त्वा॒ऽमृता॑य॒ कं॓ शमूधो॑ रोम॒शं॓ ह॑थो दे॒वेषु॑ कृ॒णुतो॒ दुवः॑॥ १२॥
आरो॑ह॒ नव॑॥ १२॥

((āro̍ho̱rumupa̍barhasva bā̱huṃ pari̍ṣvajasva jā̱yāṃ̐ su̍mana̱syamā̍naḥ |
tasyā̍ṃ̍ puṣyataṃ mithu̱nau sayo̍nī ba̱hvīṃ pra̱jāṃ ja̱naya̍ntau̱ sare̍tasā |
ā̱rdrayā'ra̍ṇyā̱ yatrāma̍ntha̱tpuru̍ṣa̱ṃ puru̍ṣe̱ṇa śa̱kraḥ |
tade̱tau mi̍thu̱nau sayo̍nī pra̱jayā̱'mṛte̍ne̱ha ga̍cchatam |
a̱haṃ garbha̱mada̍dhā̱moṣa̍dhīṣva̱haṃ viśve̍ṣu̱ bhuva̍neṣva̱ntaḥ |
a̱haṃ pra̱jā a̍janayaṃ pi̱tṝṇāma̱haṃ jani̍bhyo apa̱rīṣu̍ pu̱trān |
pu̱triṇe̱mā ku̍mā̱riṇā̱ viśva̱māyu̱rvya̍śnutam |
u̱bhā hira̍ṇyapeśasā vī̱tiho̍trā kṛ̱tadva̍sū |
da̱śa̱syantvā̱'mṛtā̍ya̱ kaṃ̐ śamūdho̍ roma̱śaṃ̐ ha̍tho de̱veṣu̍ kṛ̱ṇuto̱ duva̍ḥ || 12 ||
āro̍ha̱ nava̍ || 12 ||))

[[1-13]]

विष्णु॒र्योनिं॑ कल्पयतु॒ त्वष्टा॑ रू॒पाणि॑ पिं॓शतु।
आसि॑ञ्चतु प्र॒जाप॑तिर्धा॒ता गर्भं॑ दधातु ते।
गर्भं॑ धेहि सिनीवालि॒ गर्भं॑ धेहि सरस्वति।

गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा।
हिरण्ययी अरणी यं निर्मन्थतो अश्विना।
तं ते गर्भꣳ हवामहे दशमे मासि सूतवे।
यथेयं पृथिवी मही तिष्ठन्ती गर्भमादधे।
एवं त्वं गर्भमाधत्स्व दशमे मासि सूतवे।
यथा पृथिव्यग्निगर्भा द्यौर्यथेन्द्रेण गर्भिणी।
वायुर्यथा दिशां गर्भ एवं गर्भं दधामि ते।
विष्णो श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम्।
पुमाꣳसं गर्भमाधेहि दशमे मासि सूतवे।
नेजमेष परापत सपुत्रः पुनरापत।
अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान्।
व्यस्य योनिं प्रति रेतो गृहाण पुमान्पुत्रो धीयतां गर्भो अन्तः।
तं माता दशमासो बिभर्तु स जायतां वीरतमस्स्वानाम्।
आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिम्।
आ वीरो जायतां पुत्रस्ते दशमास्यः॥ १३॥
गर्भं दधामि तेऽष्टौ च॥ १३॥

((viṣṇuryonim̐ kalpayatu tvaṣṭā rūpāṇi pim̐śatu |
āsiñcatu prajāpatirdhātā garbham̐ dadhātu te |
garbham̐ dhehi sinīvāli garbham̐ dhehi sarasvati |
garbham̐ te aśvinau devāvādhattām puṣkarasrajā |
hiraṇyayī araṇī yam̐ nirmanthato aśvinā |
tam̐ te garbham̐ havāmahe daśame māsi sūtave |
yatheyam̐ pṛthivī mahī tiṣṭhantī garbhamādadhe |
evam̐ tvam̐ garbhamādhatsva daśame māsi sūtave |
yathā pṛthivyagnigarbhā dyauryathendreṇa garbhiṇī |
vāyuryathā diśām̐ garbha evam̐ garbham̐ dadhāmi te |
viṣṇo śreṣṭhena rūpeṇāsyām̐ nāryām̐ gavīnyām |
pumām̐sam̐ garbhamādhehi daśame māsi sūtave |
nejameṣa parāpata saputraḥ punarāpata |
asyai me putrakāmāyai garbhamādhehi yaḥ pumān |
vyasya yonim̐ prati reto gṛhāṇa pumānputro dhīyatām̐ garbho antaḥ |
tam̐ mātā daśamāso bibhartu sa jāyatām̐ vīratamassvānām |
ā te garbho yonimetu pumānbāṇa iveṣudhim |
ā vīro jāyatām̐ putraste daśamāsyaḥ || 13 ||
garbham̐ dadhāmi te'ṣṭau ca || 13 ||))

[[1-14]]
क॒रोमि॑ ते प्राजाप॒त्यमा गर्भो॒ योनि॑मेतु ते।
अनू॑नः पू॒र्णो जा॑यता॒मश्लो॒णोऽपि॑शाचधीतः।
पुमा॑ꣳस्ते पु॒त्रो ना॑रि॒ तं पुमा॒ननु॑जायताम्।
तानि॑ भ॒द्राणि॒ बीजा॑न्यृ॒षभा ज॑नयन्तु नौ।
यानि॑ भ॒द्राणि॒ बीजा॑न्यृ॒षभा ज॑नय॒न्ति न॑ः।
तैस्त्वं पु॒त्रान् वि॑न्दस्व॒ सा प्र॒सूर्धे॑नु॒का भ॑व।
काम॒प्रमृ॑ध्यतां॒ मह्य॒मप॑राजितमे॒व मे॑।
यं काम॑ꣳ का॒मये॑ दे॒व तं मे॑ वायो॒ सम॑र्धय।
अ॒नु॒ह॒वं प॑रिह॒वं प॑रीवा॒दं प॑रिक्ष॒पम्।
दुस्स्व॑प्नं॒ दुरु॑दितं॒ तद्द्वि॒षद्भ्यो॑ दिशाम्य॒हम्।
अनु॑हूतं॒ परि॑हूतꣳ श॒कुने॒र्यदशा॑कु॒नम्।
मृगस्य॑ सृ॒तम॑क्ष्णया॒ तद्द्वि॒षद्भ्यो॑ दिशाम्य॒हम्।
आ॒रात्ते॑ अ॒ग्निर॑स्त्वा॒रात्प॑र॒शुर॑स्तु ते।
नि॒वाते त्वा॒ऽभि व॑र्षतु स्व॒स्ति तेऽस्तु वनस्पते स्व॒स्ति मेऽस्तु वनस्पते।
नम॑श्शकृ॒थ्सदे॑ रु॒द्राय॒ नमो॑ रु॒द्राय॑ शकृ॒थ्सदे॑।
गो॒ष्ठम॑सि॒ नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीस्सिग॑सि॒ नसि॒ वज्रो॒ नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीः।
उ॒द्गा॒तेव॑ श॒कु॒ने॒ साम॑ गायसि ब्रह्मपु॒त्र इ॒व सव॑नेषु शꣳससि।
स्व॒स्ति न॑श्श॒कुने॑ अस्तु॒ प्रति॑ नस्सु॒मना॑ भव॥ १४॥
अ॒ह॒मष्टौ च॑॥ १४॥

((karomi te prājāpatyamā garbho yonimetu te |
anūnaḥ pūrṇo jāyatāmaślono'piśācadhītaḥ |
pumām̐ste putro nāri tam pumānanujāyatām |
tāni bhadrāṇi bījānyṛṣabhā janayantu nau |
yāni bhadrāṇi bījānyṛṣabhā janayanti naḥ |
taistvaṃ putrān vindasva sā prasūrdhenukā bhava |
kāmapramṛdhyatām mahyamaparājitameva me |
yaṃ kāmam kāmaye deva taṃ me vāyo samardhaya |
anuhavaṃ parihavaṃ parīvādaṃ parikṣapam |
dussvapnam duruditam taddviṣadbhyo diśāmyaham |
anuhūtam parihūtam̐ śakuneryadaśākunam |
mṛgasya sṛtamakṣṇayā taddviṣadbhyo diśāmyaham |
ārātte agnirastvārātparaśurastu te |

nivāte tvā'bhi varṣatu svasti te'stu vanaspate svasti me'stu vanaspate |
namaśśakṛthsade rudrāya namo rudrāya śakṛthsade |
goṣṭhamasi namaste astu mā mā hiṁsīssigasi nasi vajro namaste astu mā mā hiṁsīḥ |
udgāteva śakune sāma gāyasi brahmaputra iva savaneṣu śaṁsasi |
svasti naśśakune astu prati nassumanā bhava || 14 ||
ahamaṣṭau ca || 14 ||))

[[1-15]]

प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रꣳ हुवेम।
प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह।
भग प्रणेतर्भग सत्यराधो भगेमां धियमुदव ददन्नः।
भग प्रणो जनय गोभिरश्वैर्भग प्रनृभिर्नृवन्तस्स्याम।
उतेदानीं भगवन्तस्स्यामोत प्रपित्व उत मध्ये अह्नाम्।
उतोदिता मघवन्थ्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम।
भग एव भगवाꣳ अस्तु देवास्तेन वयं भगवन्तस्स्याम।
तं त्वा भग सर्व इज्जोहवीमि स नो भग पुर एता भवेह।
समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आवहन्तु।
अश्वावतीर्गोमतीर्न उषासो वीरवतीस्सदमुच्छन्तु भद्राः।
घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिस्सदा नः॥ १५॥
भवेह चत्वारि च॥ १५॥

((prātaragnim prātarindraṁ havāmahe prātarmitrāvaruṇā prātaraśvinā |
prātarbhagam pūṣaṇam brahmaṇaspatim prātassomamuta rudraṁ huvema |
prātarjitam bhagamugraṁ huvema vayam putramaditeryo vidhartā |
āghraścidyam manyamānasturaścidrājā cidyam bhagam bhakṣītyāha |
bhaga praṇetarbhaga satyarādho bhagemām dhiyamudava dadannaḥ |
bhaga prano janaya gobhiraśvairbhaga pranṛbhirnṛvantassyāma |
utedānīm bhagavantassyāmota prapitva uta madhye ahnām |
uto̍ditā maghavanthsūryasya vayam devānāṁ sumatau syāma |
bhaga eva bhagavāṁ astu devāstena vayam bhagavantassyāma |
tam tvā bhaga sarva ijjohavīmi sa no bhaga pura etā bhaveha |
samadhvarāyoṣaso namanta dadhikrāveva śucaye padāya |
arvācīnam vasuvidam bhagam no rathamivāśvā vājina āvahantu |

aśvȧvatīrgomȧtīrna uṣāsȯ vīravȧtīssadȧmucchantu bhadrāḥ ।
ghṛtaṃ duhȧnā viśvataḥ prapȋnā yūyaṃ pȧta svastibhissadȧ naḥ ॥ 15 ॥
bhaveha catvārȋ ca ॥ 15 ॥))

[[1-16]]
इमां खनाम्योषधीं वीरुधं बलवत्तमाम्।
यया सपत्नीं बाधते यया संविन्दते पतिम्।
उत्तानपर्णे सुभगे सहमाने सहस्वति।
सपत्नीं मे पराधम पतिं मे केवलं कृधि।
उत्तराऽहमुत्तर उत्तरेदुत्तराभ्यः।
अथा सपत्नी या ममाधरा साऽधराभ्यः।
न ह्यस्यै नाम गृभ्णामि नो अस्मिन्रमते जनै।
परामेव परावतꣳ सपत्नीं नाशयामसि।
अहमस्मि सहमानाऽथ त्वमसि सासहिः।
उभे सहस्वती भूत्वा सपत्नीं मे सहावहै।
उप तेऽधाꣳ सहमानामभि त्वाऽधाꣳ सहीयसा।
मामनु प्र ते मनो वथ्सं गौरिव धावतु पथा वारिव धावतु॥ १६॥
सहावहै द्वे च॥ १६॥

((imāṃ khanāmyoṣȧdhīṃ vīrudhaṃ balȧvattamām ।
yayȧ sapatnīṃ bādhȧte yayȧ saṃvindate patim ।
uttānapȧrṇe subhȧge sahȧmāne sahȧsvati ।
sapatnīṃ me parȧdhama patiṃ me kevȧlaṃ kṛdhi ।
uttȧrā'hamuttȧra uttareduttȧrābhyaḥ ।
athȧ sapatnī yā mamādhȧrā sā'dhȧrābhyaḥ ।
na hyȧsyai nāmȧ gṛbhṇāmi no asminrȧmate jane ।
parȧmeva pȧrāvataṃ sapatnīṃ nāśayāmasi ।
ahamȧsmi sahȧmānā'tha tvamȧsi sāsahiḥ ।
ubhe sahȧsvatī bhūtvā sapatnīṃ me sahāvahai ।
upȧ te'dhāṃ sahȧmānāmabhi tvȧ'dhāṃ sahȋyasā ।
māmanu pra te manȯ vathsaṃ gaurȋva dhāvatu pathā vārȋva dhāvatu ॥ 16 ॥
sahāvahai dve cȧ ॥ 16 ॥))

[[1-17]]
उदसौ सूर्यो अगादुदयं मामको भगः।

अ॒हं त॒द्वि॒द्व॒ला पति॑म॒भ्य॑साक्षि विषा॒स॒हिः।
अ॒हं के॒तुर॒हं मू॒र्धा॑ऽहमु॒ग्रा वि॒वाच॑नी।
ममेद॒नु क्रतुं॒ पति॑स्सेहा॒नाया॑ उ॒वाच॑रेत्।
मम॑ पु॒त्राश्श॑त्रु॒हणो॒ऽथो॑ मे दुहि॒ता वि॒राट्।
उ॒ताहम॑स्मि॒ संज॑या॒ पत्यु॑र्मे॒ श्लोक॑ उत्त॒मः।
येनेन्द्रो॑ ह॒विषा॑ कृ॒त्य॑भवद्दि॒व्यु॑त्त॒मः।
अ॒हं तद॑क्रि दे॒वा अस्प॒त्ना कि॒ला॑भवम्।
अ॒स॒प॒त्ना स॑पत्नि॒घ्नी जय॑न्त्यभि॒भूव॑रीः।
आवि॑थ्सि॒ सर्वा॑सा॒ꣳ राधो॒ वर्चो॑ अस्थे॑यसामिव।
सम॑जैषमि॒मा अ॒हꣳ स॒पत्नी॑रभि॒भूव॑रीः।
यथा॒ऽहम॑स्य वी॒रस्य॑ वि॒राजा॑मि॒ धन॑स्य च॥ १७॥
अस्थे॑यसामिव॒ द्वे च॑॥ १७॥

((ud̠asau sūryȯ agād̠uday̠aṃ mȧm̠ako bhagȧḥ |
a̠haṃ tadvidva̠lā pȧtima̠bhyȧsākṣi viṣāsa̠hiḥ |
a̠haṃ ke̠tura̠haṃ mūrdhā'hamu̠grā vi̠vācȧnī |
mamedanu̠ kratuṃ̠ patȧ̇ssehā̠nāyȧ u̠vācȧret |
mamȧ pu̠trāśśȧtru̠hano̠'thȯ me duhi̠tā vi̠rāṭ |
u̠tāhamȧsmi̠ saṃjȧyā̠ patyȯrme̠ ślokȧ utta̠maḥ |
yenendrȯ ha̠viṣȧ kr̠tyȧbhavaddi̠vyȯtta̠maḥ |
a̠haṃ tadȧkri devā aspa̠tnā kilȧbhavam |
a̠sa̠pa̠tnā sȧpatni̠ghnī jayȧntyabhi̠bhūvȧrīḥ |
āvȧthsi̠ sarvȧsā̠ṁ rādho̠ varco̠ asthȧyasāmiva |
samȧjaiṣami̠mā a̠haṁ sa̠patnȧ̇rabhi̠bhūvȧrīḥ |
yathā̠'hamȧsya vī̠rasyȧ vi̠rājȧmi̠ dhanȧsya ca || 17 ||
asthȧyasāmiva̠ dve cȧ || 17 ||))

[[1-18]]
अ॒क्षीभ्यां॑ ते॒ नासि॑काभ्यां॒ कर्णा॑भ्यां॒ चुबु॑का॒दधि॑।
यक्ष्म॒ꣳ शी॒र्ष॒ण्यं॑ म॒स्तिष्का॒ज्जिह्वा॑या॒ विवृ॑हामि ते।
ग्री॒वाभ्य॑स्त उ॒ष्णिहा॑भ्यः॒ कीक॑साभ्यो॒ऽनू॒क्या॑त्।
यक्ष्मं॑ दो॒ष॒ण्य॑मꣳसा॑भ्यां बा॒हुभ्यां॒ विवृ॑हामि ते।
आ॒न्त्रेभ्य॑स्ते॒ गुदा॑भ्यो वनि॒ष्ठोर्॒ हृद॑या॒दधि॑।
यक्ष्मं॒ मत॑स्नाभ्यां य॒क्नः प्ला॒शिभ्यो॒ विवृ॑हामि ते।

ऊरुभ्यां तेऽष्ठीवद्भ्यां जङ्घाभ्यां प्रपदाभ्याम् ।
यक्ष्मꣳ श्रोणीभ्यां भासदाद्भꣳससो विवृहामि ते ।
मेहनाद्वलङ्करणाल्लोमभ्यस्ते नखेभ्यः ।
यक्ष्मꣳ सर्वस्मादात्मनस्तमिमं विवृहामि ते ।
अङ्गादङ्गाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि ।
यक्ष्मꣳ सर्वस्मादात्मनस्तमिमं विवृहामि ते ।
परादेहि शाबल्यं ब्रह्मभ्यो विभजा वसु ।
कृत्यैषा पद्वती भूत्वा जायाऽऽविशते पतिम् ।
आश्लीला तनूर्भवति रुशती पापयाऽमुया ।
पतिर्यद्वध्वै वाससा स्वमङ्गमभि धित्सति ।
क्रूरमेतत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे ।
सूर्यां यः प्रत्यक्षं विद्यात्स एतत्प्रतिगृह्णीयात् ।
आशासनं विशसनमथो अधि विचर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शꣳसति ॥ १८ ॥
इमं विवृहामि ते शꣳसति ॥ १८ ॥

अक्षीभ्यां ग्रीवाभ्य आन्त्रेभ्य ऊरुभ्यां मेहनादङ्गादङ्गात्परादेहि सप्त ॥
प्रसुग्मन्ताऽष्टादश हिरण्यवर्णाः पञ्चदश सोमः प्रथमष्षोडश सोमाय जनिविदेऽष्टादशातिष्ठेमं त्रयोविꣳ शतिस्सत्येन ता मन्दसानैकान्न विꣳशतिरेकान्न विꣳशतिश्शर्म वर्मैकविꣳशतिरिह गाव एकान्न विꣳशतिरुदीर्ष्वातो दशापश्यं त्वा द्वादशारोहोरुं नव विष्णुर्योनिं करोमि तेऽष्टादशाष्टादश प्रतरग्निं चतुर्दशेमां खनाम्युदसौ सूर्यो द्वादशद्वादशाक्षीभ्यां ते विꣳशतिरष्टादश ॥ १८ ॥

प्रसुग्मन्ताऽपश्यं त्वाऽष्टादश ॥ १८ ॥

प्रसुग्मन्ता तानि ब्रह्मोत शꣳसति ॥

((akṣībhyāṁ te nāsikābhyām karṇābhyām cubukādadhi |
yakṣmaṁ śīrṣaṇyaṁ mastiṣkājjihvāyā vivṛhāmi te |
grīvābhyasta uṣṇihābhyaḥ kīkasābhyo'nūkyāt |
yakṣmaṁ doṣaṇyamaṁsābhyām bāhubhyām vivṛhāmi te |
āntrebhyaste gudābhyo vaniṣṭhor hṛdayādadhi |

yakṣmam̱ matȧsnābhyām̱ ya̱knaḥ plā̱śibhyo̱ vivṛ̇hāmi te ।
ū̱rubhyām̈̇ te'ṣṭhī̱vadbhyām̱ jaṅghā̈bhyām̱ prapȧdābhyām ।
yakṣma̱m̈̇ śroṇī̈bhyām̱ bhā̱sadā̈ddhva̱m̈sa̱so̱ vivṛ̇hāmi te ।
mehȧnādvala̱ṅkarȧṇā̱llomȧbhyaste na̱khebhyȧḥ ।
yakṣma̱m̐ sarvȧsmādā̱tmana̱stami̱mam̱ vivṛ̇hāmi te ।
aṅgȧdaṅgā̱llomnȯlomno jā̱tam̱ parvȧṇiparvaṇi ।
yakṣma̱m̐ sarvȧsmādā̱tmana̱stami̱mam̱ vivṛ̇hāmi te ।
parā̇dehi śāba̱lyam̱ bra̱hmabhyo̱ vibhȧjā̱ vasu̇ ।
kṛ̱tyaiṣā pa̱dvatī̇ bhū̱tvā jā̱yā''vi̇śate̱ patī̈m ।
ā̱ślī̱lā ta̱nūrbhȧvati̱ ruśȧtī pā̱payā̇'mu̱yā ।
pati̱ryadva̱dhvai̇ vāsȧsā̱ svamaṅgȧmabhi̱ dhithsȧti ।
krū̱rame̱tatkaṭu̇kame̱tadȧpā̱ṣṭhavȧdvi̱ṣava̱nnaitadattȧve ।
sū̱ryām̱ yaḥ pra̱tyakṣam̐ vi̱dyāthsa e̱tatpratī̇gṛhṇīyāt ।
ā̱śāsȧnam̱ vi̱śasȧna̱mathȯ adhi vi̱cartȧnam ।
sū̱ryāyā̈ḥ paśya rū̱pāṇi̱ tānī̇ bra̱hmota śam̐sati ॥ 18 ॥
i̱mam̱ vivṛ̇hāmi te śam̐sati ॥ 18 ॥

a̱kṣībhyām̈̇ grī̱vābhyȧ ā̱ntrebhyȧ ū̱rubhyām̱ mehȧnā̱daṅgā̇daṅgā̱tparā̇dehi sa̱pta ॥
pra̱su̱gmantā̱'ṣṭādȧśa̱ hirȧṇyavarṇā̱ḥ pañcȧdaśa̱ somȧḥ pratha̱maṣṣoḍȧśa̱ somā̇ya
jani̱vide̱'ṣṭāda̱śātī̇ṣṭhe̱mam̱ trayȯvim̐ śatissa̱tyena̱ tā mȧndasā̱naikā̱nna
vim̐śati̱rekā̱nna vim̐śati̱śśarma̱ varmaikȧvim̐śatiri̱ha gāva̱ ekā̱nna vim̐śatirudī̱rṣvāto̱
daśāpȧśyam̱ tvā̱ dvāda̱śārȯho̱rum̱ nava̱ viṣṇu̱ryonim̐ ka̱romī̇ te̱'ṣṭādȧśā̱ṣṭādaśa
pra̱tara̱gnim̱ catu̇rdaśe̱mām̱ khanā̱myuda̱sau sūryo̱ dvādȧśadvādaśā̱kṣībyām̈̇ te
vim̐śa̱tira̱ṣṭādȧśa ॥ 18 ॥

pra̱su̱gmantā'pȧśyam̱ tvā̱'ṣṭādȧśa ॥ 18 ॥

pra̱su̱gmantā̱ tānī̇ bra̱hmota śam̐sati ॥))

# Ekāgni-Kāṇḍa

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 2

[[2-1]]
उ॒ष्णेन॑ वायवुद॒केनेह्यदि॑ति॒ः केशा॑न् वपतु।
आप॑ उन्दन्तु जी॒वसे॑ दीर्घायु॒त्वाय॒ वर्च॑से।
ज्योक्च॒ सूर्यं॑ दृ॒शे।
येनाव॑पथ्सवि॒ता क्षु॒रेण॒ सोम॑स्य॒ राज्ञो॒ वरु॑णस्य वि॒द्वान्।
तेन॑ ब्रह्माणो वपते॒दम॒स्यायु॑ष्मा॒ञ्जर॑दष्टि॒र्यथाऽस॑द॒यम॒सौ।
येन॑ पू॒षा बृ॒हस्पते॑र॒ग्नेरिन्द्र॑स्य॒ चायु॒षेऽव॑पत्।
तेना॒स्यायु॑षे वप॒ सौश्लो॑क्याय स्व॒स्तये॑।
येन॒ भूय॒श्चरा॑त्य॒यं ज्योक्च॒ पश्या॑ति॒ सूर्य॑म्।
तेना॒स्यायु॑षे वप॒ सौश्लो॑क्याय स्व॒स्तये॑।
येन॑ पू॒षा बृ॒हस्पते॑र॒ग्नेरिन्द्र॑स्य॒ चायु॒षेऽव॑पत्।
तेन॑ ते वपाम्यसा॒वायु॑षा॒ वर्च॑सा॒ यथा॒ ज्योक्सु॒मना॒ असाः॑।
यत्क्षु॒रेण॑ म॒र्चय॑ता सु॒पेश॑सा॒ वप्त्रा॒ वप॑सि॒ केशा॑न्।
शु॒न्धि॒ शिरो॒ माऽस्यायु॒ः प्रमो॑षीः।
उ॒प्त्वाय॒ केशा॒न्वरु॑णस्य॒ राज्ञो॒ बृ॒हस्पति॑स्सवि॒ता सोमो॑ अ॒ग्निः।
तेभ्यो॑ नि॒धानं॑ बहु॒धाऽन्व॑विन्दन्नन्त॒रा द्यावा॑पृथि॒वी अ॒पस्सुवः॑॥ १॥
आयु॒षेऽव॑प॒त्पञ्च॑ च॥ १॥

((u̱ṣṇena̍ vāyavuda̱kenehyadi̍ti̱ḥ keśā̍n vapatu |
āpa̍ undantu jī̱vase̍ dīrghāyu̱tvāya̱ varca̍se |
jyokca̱ sūrya̍ṁ dṛ̱śe |
yenāva̍pathsavi̱tā kṣu̱reṇa̱ soma̍sya̱ rājño̱ varu̍ṇasya vi̱dvān |
tena̍ brahmāṇo vapate̱dama̱syāyu̍ṣmā̱ñjara̍daṣṭi̱ryathā'sa̍da̱yama̱sau |
yena̍ pū̱ṣā bṛ̱haspate̍ra̱gnerindra̍sya̱ cāyu̱ṣe'va̍pat |
tenā̱syāyu̍ṣe vapa̱ sauślo̍kyāya sva̱staye̍ |

yena bhūyaścarātyayam jyokca paśyāti sūryām |
tenāsyāyuṣe vapa sauślokyāya svastaye |
yena pūṣā bṛhaspateragnerindrasya cāyuṣe'vapat |
tena te vapāmyasāvāyuṣā varcasā yathā jyoksumanā asāḥ |
yatkṣureṇa marcayatā supeśasā vaptrā vapāsi keśān |
śundhi śiro mā'syāyuḥ pramoṣīḥ |
uptvāya keśānvaruṇasya rājño bṛhaspatissavitā somo agniḥ |
tebhyo nidhānam bahudhā'nvavindannantarā dyāvāpṛthivī apassuvaḥ || 1 ||
āyuṣe'vapatpañca ca || 1 ||))

[[2-2]]

आयुर्दा देव जरसं गृणानो घृतप्रतीको घृतपृष्ठो अग्ने।
घृतं पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसे नयेमम्।
आतिष्ठेममश्मानमश्मेव त्वꣳ स्थिरो भव।
अभितिष्ठ पृतन्यतस्सहस्व पृतनायतः।
रेवतीस्त्वा व्यक्ष्णन्कृत्तिकाश्चाकृन्तꣳस्त्वा।
धियोऽवयन्नव ग्ना अवृञ्जन्थ्सहस्रमन्ताꣳ अभितो अयच्छन्न्।
देवीर्देवाय परिधी सवित्रे।
महत्तदासामभवन्महित्वनम्।
या अकृन्तन्नवयन् या अतन्वत याश्च देवीरन्तानभितोऽददन्त।
तास्त्वा देवीर्जरसे संव्ययन्त्वायुष्मानिदं परिधथ्स्व वासः।
परिधत्त धत्त वाससैनꣳ शतायुषं कृणुत दीर्घमायुः।
बृहस्पतिः प्रायच्छद्वास एतथ्सोमाय राज्ञे परिधातवा उ।
जरां गच्छासि परिधथ्स्व वासो भवा कृष्टीनामभिशस्तिपावा।
शतं च जीव शरदस्सुवर्चा रायश्च पोषमुप संव्ययस्व।
परीदं वासो अधिधास्स्वस्तयेऽभूरापीनामभिशस्तिपावा।
शतं च जीव शरदः पुरूचीर्वसूनि चार्यो विभजासि जीवनन्न्।
इयं दुरुक्तात्परिबाधमाना शर्म वरूथं पुनती न आगात्।
प्राणापानाभ्यां बलमाभरन्ती प्रिया देवानाꣳ सुभगा मेखलेयम्।
ऋतस्य गोप्त्री तपसः परस्पी घ्नती रक्षस्सहमाना अरातीः।
सा नस्समन्तमनु परीहि भद्रया भर्तारस्ते मेखले मा रिषाम।
मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳ समिद्धम्।
अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजिनं दधेऽहम्॥ २॥

वासो॒ मारि॑षाम॒ द्वे च॑॥ २॥

((ā̱yu̱rdā de̍va ja̱rasaṃ̍ gṛ̱ṇā̱no ghṛ̱tapra̍tīko ghṛ̱tapṛ̍ṣṭho agne |
ghṛ̱taṃ piba̍nna̱mṛtaṃ̱ cāru̱ gavyaṃ̍ pi̱teva̍ pu̱traṃ ja̱rase̍ naye̱mam |
āti̍ṣṭhe̱mamaśma̍na̱maśme̍va̱ tvam̐̍ sthi̱ro bha̍va |
a̱bhiti̍ṣṭha pṛtanya̱tassaha̍sva pṛtanāya̱taḥ |
re̱vatī̎stvā̱ vya̍kṣṇa̱nkṛtti̍kā̱ścākṛ̍ntam̐̍stvā |
dhiyo̍'vaya̱nnava̱ gnā a̍vṛñjanthsa̱hasra̱mantām̐̍ a̱bhito̍ ayacchann |
de̱vīrde̱vāya̍ pari̱dhī sa̍vi̱tre |
ma̱hattadā̍sāmabhavanmahitva̱nam |
yā akṛ̍nta̱nnava̍ya̱n yā ata̍nvata̱ yāśca̍ de̱vīrantā̍na̱bhito̍'dadanta |
tāstvā̍ de̱vīrja̱rase̱ saṃvya̍ya̱ntvāyu̍ṣmāni̱daṃ pari̍dhathsva̱ vāsa̍ḥ |
pari̍dhatta dhatta̱ vāsa̍sainam̐̍ śa̱tāyu̍ṣaṃ kṛṇuta dī̱rghamāyu̍ḥ |
bṛ̱ha̱spati̱ḥ prāya̍ccha̱dvāsa̍ e̱tathsomā̍ya̱ rājñe̱ pari̍dhāta̱vā u̍ |
ja̱rāṃ ga̍cchāsi̱ pari̍dhathsva̱ vāso̱ bhavā̍ kṛṣṭī̱nāma̍bhiśasti̱pāvā̎ |
śa̱taṃ ca̍ jīva śa̱rada̍ssuva̱varcā̍ rā̱yaśca̱ poṣa̱mupa̱ saṃvya̍yasva |
parī̱daṃ vāso̱ adhi̍dhāssva̱staye'bhū̍rāpī̱nāma̍bhiśasti̱pāvā̎ |
śa̱taṃ ca̍ jīva śa̱rada̍ḥ purū̱cīrvasū̍ni cā̱ryo vi̍bhajāsi̱ jīvann̍ |
i̱yaṃ duru̍ktātpari̱bādha̍mānā̱ śarma̱ varū̍thaṃ puna̱tī na̱ āgā̎t |
prā̱ṇā̱pā̱nābhyāṃ̱ bala̍mā̱bhara̍ntī pri̱yā de̱vānām̐̍ su̱bhagā̱ mekha̍le̱yam |
ṛ̱tasya̍ go̱ptrī tapa̍saḥ para̱spī ghna̱tī rakṣa̱ssaha̍mānā̱ arā̍tīḥ |
sā na̍ssama̱ntamanu̱ pari̍hi bha̱drayā̍ bha̱rtāra̍ste mekhale̱ mā ri̍ṣāma |
mi̱trasya̱ cakṣu̱rdharu̍ṇaṃ̱ balī̍ya̱stejo̍ yaśa̱svi sthavi̍raṃ̱̍ sami̍ddham |
a̱nā̱ha̱na̱syaṃ vasa̍naṃ jari̱ṣṇu parī̱daṃ vā̱jyajinaṃ̍ dadhe̱'ham || 2 ||
vāso̱ māri̍ṣāma̱ dve ca̍ || 2 ||))

[[2-3]]

आ॒ग॒न्त्रा सम॑गन्महि॒ प्रसु॒ मृ॒त्युं यु॑योतन।
अरि॑ष्टास्संच॑रेमहि स्व॒स्ति च॑रतादि॒ह स्व॒स्त्या गृ॒हेभ्यः॑।
स॒मु॒द्रादू॒र्मिर्मधु॑मा॒ꣳ उदा॑रदुपा॒ꣳशुना॒ सम॑मृत॒त्वम॑श्याम्।
इ॒मे नु ते र॒श्मय॒स्सूर्य॑स्य॒ येभि॑स्सपि॒त्वं पि॒तरो॑ न॒ आय॑नन्।
अ॒ग्निष्टे॒ हस्त॑मग्रभी॒थ्सोम॑स्ते॒ हस्त॑मग्रभीथ्सवि॒ता ते॒ हस्त॑मग्रभी॒थ्सर॑स्वती ते॒ हस्त॑मग्रभीत्पू॒षा ते॒
हस्त॑मग्रभीदर्य॒मा ते॒ हस्त॑मग्रभीदꣳशुस्ते॒ हस्त॑मग्रभी॒द्भग॑स्ते॒ हस्त॑मग्रभीन्मि॒त्रस्ते॒
हस्त॑मग्रभीन्मि॒त्रस्त्वम॑सि॒ धर्म॑णाऽग्निरा॑चार्य॑स्तव॑।
अ॒ग्नये॑ त्वा॒ परि॑ ददाम्यसौ॒ सोमा॑य त्वा॒ परि॑ ददाम्यसौ सवि॒त्रे त्वा॒ परि॑ ददाम्यसौ॒ सर॑स्वत्यै त्वा॒ परि॑
ददाम्यसौ मृ॒त्यवे॑ त्वा॒ परि॑ ददाम्यसौ य॒माय॑ त्वा॒ परि॑ ददाम्यसौ ग॒दाय॑ त्वा॒ परि॑ ददाम्यसावन्त॑काय
त्वा॒ परि॑ ददाम्यसाव॒द्भ्यस्त्वा॒ परि॑ ददाम्यसा॒वोष॑धीभ्यस्त्वा॒ परि॑ ददाम्यसौ पृथि॒व्यै त्वा॒ सवैश्वा॒नरा॒यै॑
परि॑ ददाम्यसौ।

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व उप॑नये॒ऽसौ।
सु॒प्र॒जाः प्र॒जया॑ भूयास्सु॒वीरो॑ वी॒रैस्सु॑वर्चा॒ वर्च॑सा सु॒पोष॒ः पोषै᳚ः।
ब्र॒ह्म॒च॒र्य॒मागा॒मु॒प मा न॑यस्व दे॒वेन॑ सवि॒त्रा प्रसू॑तः।
कोनामा᳚स्य॒सौ नामा᳚ऽस्मि॒ कस्य॑ ब्रह्मचा॒र्य॑स्यसौ प्रा॒णस्य॑ ब्रह्मचा॒र्य॑स्म्य॒सा वे॒ष ते॑ देव सूर्य ब्रह्मचा॒री
तं गो॑पाय॒ स मा मृ॑तै॒ष ते॑ सूर्य पुत्रस्सदी᳚र्घा॒युस्स॒ मा मृ॑त।
याꣳ स्व॒स्तिम॒ग्निर्वा॒युस्सूर्य॑श्च॒न्द्रमा॒ आपोऽनु॑ स॒ं चर॑न्ति॒ ताꣳ स्व॒स्तिम॑नु॒ सं च॑रासौ।
अध्व॑नामध्वपते॒ श्रेष्ठ॒स्याध्व॑नः पा॒रम॑शीय॥ ३॥
स॒मामृ॑त॒ द्वे च॑॥ ३॥

((ā̱ga̱ntrā samáganmahi̱ prasú mṛ̱tyuṃ yúyotana ।
ari̍ṣṭā̱ssaṃcáremahi sva̱sti cáratādi̱ha sva̱styā gṛ̱hebhyáḥ ।
sa̱mu̱drādū̱rmirmadhúmā̱m̐ udáradupā̱m̐śunā̱ samámṛta̱tvamáśyām ।
i̱me nu te ra̱śmaya̱ssūryásya̱ yebhi̍ssapi̱tvaṃ pi̱taró na̱ āyanń ।
a̱gniṣṭe̱ hastámagrabhī̱thsomáste̱ hastámagrabhīthsavi̱tā te̱
hastámagrabhī̱thsarásvatī te̱ hastámagrabhītpū̱ṣā te̱ hastámagrabhīdarya̱mā te̱
hastámagrabhī̱dam̐śúste̱ hastámagrabhī̱dbhagáste̱ hastámagrabhīnmi̱traste̱
hastámagrabhīnmi̱trastvamási̱ dharmáṇā̱'gnirácā̱ryastavá ।
a̱gnaye̎ tvā̱ pari̍ dadāmyasau̱ somáya tvā̱ pari̍ dadāmyasau savi̱tre tvā̱ pari̍
dadāmyasau̱ sarásvatyai tvā̱ pari̍ dadāmyasau mṛ̱tyave̎ tvā̱ pari̍ dadāmyasau ya̱māyá
tvā̱ pari̍ dadāmyasau ga̱dāyá tvā̱ pari̍ dadāmyasā̱vantákāya tvā̱ pari̍
dadāmyasāva̱dbhyastvā̱ pari̍ dadāmyasā̱voṣádhībhyastvā̱ pari̍ dadāmyasau pṛ̱thi̱vyai
tvā̱ savai̎śvāna̱rāya̱i pari̍ dadāmyasau ।
de̱vasyá tvā savi̱tuḥ prása̱va upánaye̱'sau ।
su̱pra̱jāḥ pra̱jayá bhūyāssu̱vīró vī̱raissu̱varcā̱ varcásā su̱poṣa̱ḥ poṣai̎ḥ ।
bra̱hma̱carya̱māgā̱mupa̱ mā náyasva de̱vená savi̱trā prasū́taḥ ।
konāmā̎sya̱sau nāmā̎'smi̱ kasyá brahmacā̱ryásyasau prā̱ṇasyá brahmacā̱ryásmya̱sā
ve̱ṣa té deva sūrya brahmacā̱rī taṃ gópāya̱ sa mā mṛ́tai̱ṣa té sūrya
putrassadī̎rghā̱yussa̱ mā mṛ́ta ।
yām̐ sva̱stima̱gnirvā̱yussūryáśca̱ndramā̱ āpo'nú sa̱ṃ caránti̱ tām̐ sva̱stimanu̱ saṃ
cárāsau ।
adhvánāmadhvapate̱ śreṣṭha̱syādhvánaḥ pā̱ramáśīya ॥ 3 ॥
sa̱māmṛ́ta̱ dve cá ॥ 3 ॥))

[[2-4]]
योगे॑योगे त॒वस्त॑रमि॒मम॑ग्न आयु॑षे वर्च॑से कृ॒धीति॒ द्वे।
श॒तमिन्नु श॒रदो॒ अन्ति॑ देवा॒ यत्रा॑ नश्च॒क्रा ज॒रसं॑ त॒नूना᳚म्।
पु॒त्रासो॒ यत्र॑ पि॒तरो॒ भव॑न्ति॒ मा नो॑ म॒ध्या री॑रिषतायु॒र्गन्तो᳚ः।
आ॒ग्निष्ट॒ आयु॑ः प्र॒तरां॒ द॑धात्व॒ग्निष्टे॒ पुष्टिं॑ प्र॒तरां॒ कृ॑णोतु।

इन्द्रो मरुद्भिर् ऋतुधा कृणोत्वादित्यैस्ते वसुभिरा दधातु।
मेधां मह्यमङ्गिरसो मेधाꣳ सप्तर्षयो ददुः।
मेधां मह्यं प्रजापतिर्मेधामग्निर्ददातु मे।
अप्सरासु या मेधा गन्धर्वेषु च यद्यशः।
दैवी या मानुषी मेधा सा मामाविशतादिह।
इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि।
राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषम्।
तथ्सवितुर्वरेण्यमित्येषा।
अवृधमसौ सौम्य प्राण स्वं मे गोपाय।
ब्रह्मण आणी स्थः॥ ४॥
त्वमग्ने अयासि चत्वारि च॥ ४॥

((yogéyoge ta̱vastára̱mi̱mamágna̱ āyúṣe̱ varcáse kṛ̱dhīti̱ dve |
śa̱taminnu śa̱rado̱ anti devā̱ yatrá naścakrā ja̱rasaṃ ta̱nūnām |
pu̱trāso̱ yatrá pi̱taro̱ bhavánti̱ mā nó ma̱dhyā rīriṣa̱tāyu̱rgantóḥ |
āgniṣṭa̱ āyúḥ pratarāṃ dádhātva̱gniṣṭe̱ puṣṭiṃ prata̱rāṃ kṛ̱ṇotu |
indró ma̱rudbhir ṛ̱tu̱dhā kṛ̱ṇotvādi̱tyaiste̱ vasúbhi̱rā dádhātu |
me̱dhāṃ mahya̱maṅgiraso me̱dhāṃ sápta̱rṣayó daduḥ |
me̱dhāṃ mahyaṃ pra̱jāpátirme̱dhāma̱gnirdádātu me |
a̱psa̱rāsú yā me̱dhā gándha̱rveṣú ca̱ yadyaśáḥ |
daivī̱ yā mánu̱ṣī me̱dhā sā māmāvíśatādi̱ha |
i̱maṃ mé varu̱ṇa̱ tattvā yāmi̱ tvaṃ nó agne̱ sa tvaṃ nó agne̱ tvamágne a̱yā'si |
rā̱ṣṭra̱bhṛ̱dásyācāryāsa̱ndī mā tvadyóṣam |
tathsávi̱turvarēṇya̱mitye̱ṣā |
avṛ̱dhama̱sau saúmya prā̱ṇa svaṃ mé gopāya |
brahmáṇa ā̱ṇī stháḥ || 4 ||
tvamágne a̱yāsi ca̱tvāri ca || 4 ||))

[[2-5]]
सुश्रवस्सुश्रवसं मा कुरु यथा त्वꣳ सुश्रवस्सुश्रवा अस्येवमहꣳ सुश्रवस्सुश्रवा भूयासं यथा त्वꣳ सुश्रवो देवानां निधिगोपोऽस्येवमहं ब्राह्मणानां ब्रह्मणो निधिगोपो भूयासम्।
स्मृतं च मेऽस्मृतं च मे तन्म उभयं व्रतं निन्दा च मेऽनिन्दा च मे तन्म उभयं व्रतꣳ श्रद्धा च मेऽश्रद्धा च मे तन्म उभयं व्रतं विद्या च मेऽविद्या च मे तन्म उभयं व्रतꣳ श्रुतं च मेऽश्रुतं च मे तन्म उभयं व्रतꣳ सत्यं च मेऽनृतं च मे तन्म उभयं व्रतं तपश्च मेऽतपश्च मे तन्म उभयं व्रतं व्रतं च मेऽव्रतं च मे तन्म उभयं व्रतं यद्ब्राह्मणानां ब्रह्मणि व्रतं।

यद॒ग्नेस्सेन्द्र॑स्य॒ सप्र॑जापतिकस्य॒ सदे॑वस्य॒ सदे॑वराजस्य॒ सम॑नुष्यस्य॒ सम॑नुष्यराजस्य॒ सपि॑तृकस्य॒ सपि॑तृराजस्य॒ सग॑न्धर्वाप्सर॒स्कस्य॑।
यन्म॑ आ॒त्मन॑ आ॒त्मनि॑ व्र॒तं तेना॒हꣳ सर्व॑व्रतो भूयासम्।
उदायु॑षा स्वा॒युषोदो॑षधीना॒ꣳ रसे॒नोत्प॒र्जन्य॑स्य शु॒ष्मेनोद॑स्थाम॒मृता॒ꣳ अनु॑।
तच्चक्षु॑र्दे॒वहि॑तं पु॒रस्ता॑च्छु॒क्रमु॒च्चर॑त्।
पश्ये॑म श॒रद॑श्श॒तं जीवे॑म श॒रद॑श्श॒तं नन्दा॑म श॒रद॑श्श॒तं मोदा॑म श॒रद॑श्श॒तं भवा॑म श॒रद॑श्श॒तꣳ शृ॒णवा॑म श॒रद॑श्श॒तं प्रब्र॑वाम श॒रद॑श्श॒त्मजी॑तास्स्याम श॒रद॑श्श॒तं ज्योक्च॒ सुर्यं॑ दृ॒शे।
यस्मि॑न्भू॒तं च॒ भव्यं॑ च॒ सर्वे॑ लो॒कास्स॒माहि॑ताः।
तेन॑ गृ॒ह्णामि त्वाम॒हं मह्यं॑ गृ॒ह्णामि त्वाम॒हं प्र॒जाप॑तिना त्वा॒ मह्यं॑ गृ॒ह्णाम्यसौ॥ ५॥
सु॒श्रवो॒ नव॑॥ ५॥

((su̱śravássu̱śravásam mā kuru̱ yathā̱ tvam̐ su̱śravássu̱śravá asye̱vama̱ham̐ su̱śravássu̱śravá bhūyāsa̱m yathā̱ tvam̐ su̱śravó de̱vānām̐ nidhigo̱po'sye̱vama̱haṃ brā̐hma̱ṇānām̱ brahmáṇo nidhigo̱po bhúyāsam ।
smṛtaṃ ca̱ me'smṛ́taṃ ca me̱ tanmá u̱bhayam̐ vra̱taṃ ni̱ndā ca̱ me'nindā ca me̱ tanmá u̱bhayam̐ vra̱tam̐ śra̱ddhā ca̱ me'śráddhā ca me̱ tanmá u̱bhayam̐ vra̱taṃ vi̱dyā ca̱ me'vidyā ca me̱ tanmá u̱bhayam̐ vra̱tam̐ śru̱taṃ ca̱ me'śrútaṃ ca me̱ tanmá u̱bhayam̐ vra̱tam̐ sa̱tyaṃ ca̱ me'nṛ́taṃ ca me̱ tanmá u̱bhayam̐ vra̱taṃ tapáśca̱ me'tápaśca me̱ tanmá u̱bhayam̐ vra̱taṃ vra̱taṃ ca̱ me'vrátaṃ ca me̱ tanmá u̱bhayam̐ vra̱taṃ yadbrā̐hma̱ṇānām̱ brahmáṇi vra̱taṃ ।
yada̱gnessendrásya̱ saprájāpatikasya̱ sadévasya̱ sadévarājasya̱ samánuṣyasya̱ samánuṣyarājasya̱ sapitṛkasya̱ sapitṛrājasya̱ sagándharvāpsara̱skasyá ।
yanmá ā̱tmaná ā̱tmani vra̱taṃ tenā̱ham̐ sarvávrato bhūyāsam ।
udāyúṣā svā̱yuṣodoṣádhīnām̐ rase̱notpa̱rjanyásya śu̱ṣme̱nodásthāma̱mṛtām̐ anú ।
taccakṣúrde̱vahitaṃ pu̱rastā̐cchu̱kramu̱ccarát ।
paśyéma śa̱radáśśa̱taṃ jīvéma śa̱radáśśa̱taṃ nandā́ma śa̱radáśśa̱taṃ modā́ma śa̱radáśśa̱taṃ bhavā́ma śa̱radáśśa̱taṃm̐ śṛ̱ṇavā́ma śa̱radáśśa̱taṃ prabrávāma śa̱radáśśa̱tmajitāssyāma śa̱radáśśa̱taṃ jyokca̱ suryaṃ dṛ̱śe ।
yasminbhū̱taṃ ca̱ bhavyaṃ ca̱ sarvé lo̱kāssa̱māhitāḥ ।
tená gṛ̱hṇāmi tvāma̱haṃ mahyaṃ gṛ̱hṇāmi tvāma̱haṃ pra̱jāpátinā tvā̱ mahyaṃ gṛ̱hṇāmyasau ॥ 5 ॥
su̱śravo̱ navá ॥ 5 ॥))

[[2-6]]
परि॑ त्वाऽग्ने॒ परि॑ मृजा॒म्यायु॑षा च॒ धने॑न च।
सु॒प्र॒जाः प्र॒जया॑ भूयासꣳ सु॒वीरो॑ वि॒रैस्सु॒वर्चा॒ वर्च॑सा सु॒पो॒षः पोषै॑स्सु॒गृहो॑ गृ॒हैस्सु॒पति॒ः पत्या॑ सु॒मेधा मे॒धया॑ सु॒ब्रह्मा॑ ब्रह्म॒चारि॑भिः।

अ॒ग्नये॑ स॒मिध॒माहा॑र्षं बृ॒ह॒ते जा॒तवे॑दसे।
यथा॒ त्वम॑ग्ने स॒मिधा॑ समि॒ध्यस॑ ए॒वं मामायु॑षा वर्च॑सा स॒न्या मे॒धया॑ प्र॒जया॑
प॒शुभि॑र्ब्रह्मवर्च॒सेना॒न्नाद्ये॑न॒ समे॑धय॒ स्वाहा॑।
एधो॑ऽस्येधिषी॒महि॒ स्वाहा॑।
स॒मिद॑सि समेधिषी॒महि॒ स्वाहा॑।
तेजो॑ऽसि॒ तेजो॒ मयि॑ धेहि॒ स्वाहा॑।
अपो॑ अ॒द्यान्व॑चारिष॒ꣳ रसे॑न॒ सम॑सृक्ष्महि।
पय॑स्वाꣳ अग्न॒ आग॑म॒ं तं मा॒ सꣳसृ॑ज॒ वर्च॑सा॒ स्वाहा॑।
सं मा॑ऽग्ने॒ वर्च॑सा सृज प्र॒जया॑ च॒ धने॑न च॒ स्वाहा॑।
वि॒द्युन्मे॑ अस्य दे॒वा इन्द्रो॑ वि॒द्यात्स॒ह ऋषि॑भि॒स्स्वाहा॑।
अ॒ग्नये॑ बृ॒ह॒ते नाका॑य॒ स्वाहा॑।
द्यावा॑पृथि॒वीभ्या॒ꣳ स्वाहा॑।
ए॒षा ते॑ अग्ने स॒मित्तया॒ वर्ध॑स्व॒ चाप्या॑यस्व च॒ तया॒ऽहं वर्ध॑मानो भूयासमा॒प्याय॑मानश्च॒ स्वाहा॑।
यो मा॑ऽग्ने भा॒गिन॑ꣳ स॒न्तमथा॑भागं चिकी॑र्षति।
अभा॒गम॑ग्ने॒ तं कु॑रु॒ माम॑ग्ने भा॒गिनं॑ कुरु॒ स्वाहा॑।
स॒मिध॑मा॒धाया॑ग्ने सर्व॑व्रतो भूयास॒ꣳ स्वाहा॑।
ब्र॒ह्म॒चार्य॑स्यपो॑ऽशान॒ कर्म॑ कुरु मा सु॒षु॑प्थाः।
भि॒क्षा॒च॒र्यं॑ चराचार्या॑धी॒नो भ॑व।
यस्य॑ ते प्रथमवा॒स्य॑ꣳ हरा॑म॒स्तं त्वा॒ विश्वे॑ अवन्तु दे॒वाः।
तं त्वा॒ भ्रात॑रस्सु॒वृधो॒ वर्ध॑मानमनु॑ जायन्तां ब॒हव॒स्सुजा॑तम्॥ ६॥
धने॑न च॒ स्वाहा॑ दे॒वा एकं॑ च॥ ६॥

((pari tvā'gne pari mṛjāmyāyuṣā ca dhanena ca |
suprajāḥ prajayā bhūyāsam̐ suvīro viraissuvarcā varcasā suposaḥ posaissugṛho
gṛhaissupatiḥ patyā sumedhā medhayā subrahmā brahmacāribhiḥ |
agnaye samidhamāhārṣam bṛhate jātavedase |
yathā tvamagne samidhā samidhyasa evaṃ māmāyuṣā varcasā sanyā medhayā
prajayā paśubhirbrahmavarcasenānnādyena samedhaya svāhā |
edho'syedhiṣīmahi svāhā |
samidasi samedhiṣīmahi svāhā |
tejo'si tejo mayi dhehi svāhā |
apo adyānvacāriṣam̐ rasena samasṛkṣmahi |
payasvām̐ agna āgamaṃ taṃ mā sam̐sṛja varcasā svāhā |
saṃ mā'gne varcasā sṛja prajayā ca dhanena ca svāhā |

vi̱dyunme̍ asya de̱vā indro̍ vi̱dyāthsa̱ha ṛ̱ṣi̍bhi̱ssvāhā̎ |
a̱gnaye̍ bṛha̱te nāka̍ya̱ svāhā̎ |
dyāvā̍pṛ̱thi̱vībhyā̱m̐ svāhā̎ |
e̱ṣā te̍ agne sa̱mittayā̱ vardha̍sva̱ cāpyā̍yasva ca̱ tayā̱'ha̱ṃ vardha̍māno
bhūyāsamā̱pyāyā̍mānaśca̱ svāhā̎ |
yo mā̎'gne bhāginam̐̍ sa̱ntamathā̍bhāgaṃ ciki̍rṣati |
abhā̱gamā̍gne̱ taṃ ku̍ru̱ māmā̍gne bhā̱ginam̐̍ kuru̱ svāhā̎ |
sa̱midhā̍mā̱dhāyā̎gne̱ sarvā̍vrato bhūyāsa̱m̐̎ svāhā̎ |
bra̱hma̱cā̱ryā̍syapo̍'śāna̱ karma̍ kuru̱ mā suṣu̍pthāḥ |
bhi̱kṣā̱ca̱ryaṃ̍ carācāryādhī̱no bhā̍va |
yasyā̍ te prathamavā̱syam̐̍ harā̍ma̱staṃ tvā̱ viśve̍ avantu de̱vāḥ |
taṃ tvā̱ bhrātā̍rassu̱vṛdho̱ vardhā̍mānā̱manu̍ jāyantāṃ ba̱hava̱ssujā̍tam || 6 ||
dhane̍na ca̱ svāhā̍ de̱vā ekaṃ̍ ca || 6 ||))

[[2-7]]

इ॒मꣳ स्तोम॒मर्ह॑ते जा॒तवे॑दसे॒ रथ॑मिव॒ संम॑हेमा मनी॒षया᳚।
भ॒द्रा हि न॒ः प्रम॑तिरस्य स॒ꣳ॒सद्यग्ने᳚ स॒ख्ये᳚ मा रि॑षामा व॒यं तव॑।
त्र्या॒यु॒षं ज॒मद॑ग्नेः क॒श्यप॑स्य त्र्यायु॒षम्।
यद्दे॒वानां᳚ त्र्यायु॒षं तन्मे᳚ अस्तु त्र्यायु॒षम्।
शि॒वो नामा॑सि॒ स्वधि॑तिस्ते पि॒ता नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीः।
उ॒ष्णेन॑ वायवुद॒केने॒त्ये॒षः।
इ॒दम॒हम॒मुष्या॑मुष्याय॒णस्य॑ पा॒प्मान॒ मुप॑गूहा॒म्युत्त॑रो॒ऽसौ द्वि॒षद्भ्यः॑।
आपो॒ हि॒ष्ठा म॑यो॒भुव॒ इति॑ ति॒स्रो हिर॑ण्यवर्णा॒श्शुच॑यः पाव॒का इति॑ ति॒स्रः।
अ॒न्नाद्या॑य॒ व्यू॑हध्वं दीर्घा॒यु॒र॒हम॑न्ना॒दो भू॑यासम्।
सोमो॒ राजा॒ यमाग॑म॒थ्स मे॒ मुख॒ं प्रवे᳚क्ष्यति॒ भगे॑न स॒ह वर्च॑सा।
सोम॑स्य त॒नूर॑सि त॒नुवं॑ मे पाहि॒ स्वा मा॑ त॒नूरावि॑श।
नमो᳚ ग्र॒हाय॑ चाभि॒ग्रहाय॑ च॒ नम॑श्शाकज॒ञ्जभाभ्यां॒ न॒मस्ताभ्यो᳚ दे॒वता᳚भ्यो॒ या अ॑भिग्रा॒हिणीः᳚।
अ॒प्स॒रस्सु॒ यो ग॒न्धो ग॑न्ध॒र्वेषु॑ च॒ यद्यशः॑।
दैवो॒ यो मा॑नु॒षो ग॒न्धस्स मा॑ ग॒न्धस्सु॑र॒भिर्जु᳚षताम्।
इ॒यमोष॑धे॒ त्राय॑माणा॒ सह॑माना॒ सह॑स्वती।
सा मा॒ हिर॑ण्यवर्च॑सं ब्रह्मव॒र्च॑सिनं॑ मा करोतु।
अपा॑शो॒ऽस्युरो᳚ मे॒ मा सꣳ शा॑रीरि॒श्शिवो मोप॑ तिष्ठस्व दीर्घा॒यु॒त्वाय॑ श॒तशा॑रदाय।
श॒तꣳ श॒रद्भ्य॒ आयु॑षे॒ वर्च॑से जी॒वात्वै पुण्या॑य।
रे॒वती᳚स्त्वा॒ व्य॑क्ष्ण॒न्नित्ये॒ताः॥ ७॥

स॒ह व॒र्च॑सा॒ नव॑ च॥ ७॥

((i̱mam̐ stoma̱marha̍te jā̱tave̍dase̱ ratha̍miva̱ saṃma̍hemā manī̱ṣayā̎ ।
bha̱drā hi na̱ḥ prama̍tirasya sa̱m̐sadyagne̍ sa̱khye̍ mā ri̍ṣāmā va̱yaṃ̱ tava̍ ।
tryā̱yu̱ṣaṃ ja̱mada̍gneḥ ka̱śyapa̍sya tryāyu̱ṣam ।
yadde̱vānā̎m̐ tryāyu̱ṣaṃ tanme̍ astu tryāyu̱ṣam ।
śi̱vo nāma̍si̱ svadhi̍tiste pi̱tā nama̍ste astu̱ mā mā̍ him̐sīḥ ।
u̱ṣṇena̍ vāyavuda̱kenetye̱ṣaḥ ।
i̱dama̱hama̱muṣya̍muṣyāya̱ṇasya̍ pāpmāna̱ mupa̍gūhā̱myuttara̍o'sau dvi̱ṣadbhya̍ḥ ।
āpo̱ hiṣṭhā ma̍yo̱bhuva̱ iti̍ ti̱sro hira̍ṇyavarṇā̱śśuca̍yaḥ pāva̱kā iti̍ ti̱sraḥ ।
a̱nnādyā̍ya̱ vyū̍hadhvaṃ dīrghāyura̱hama̍nnā̱do bhū̍yāsam ।
somo̱ rājā̱ yamāga̍ma̱thsa me̱ mukha̱ṃ prave̎kṣyati̱ bhage̍na sa̱ha varca̍sā ।
soma̍sya ta̱nūra̍si ta̱nuva̱ṃ me pāhi̱ svā mā̍ ta̱nūrāvi̍śa ।
namo̎ gra̱hāya̍ cābhigra̱hāya̍ ca̱ nama̍śśākajañja̱bhābhyā̱ṃ nama̱stābhyo̍ de̱vatā̎bhyo̱ yā a̍bhigrā̱hiṇī̎ḥ ।
a̱psa̱rassu̱ yo ga̱ndho ga̍ndha̱rveṣu̍ ca̱ yadyaśa̍ḥ ।
daivo̱ yo mā̍nu̱ṣo ga̱ndhassa mā̍ ga̱ndhassu̍ra̱bhirju̍ṣatām ।
i̱yamoṣa̍dhe̱ trāya̍mā̱ṇā̱ saha̍mānā̱ saha̍svatī ।
sā mā̱ hira̍ṇyavarcasaṃ brahmavarca̱sinaṃ̱ mā karotu ।
apā̎śo̱'syuro̍ me̱ mā sam̐ śā̍rīśśi̱vo mopa̍ tiṣṭhasva dīrghāyu̱tvāya̍ śa̱taśā̍radāya ।
śa̱tam̐ śa̱radbhya̱ āyu̍ṣe̱ varca̍se jī̱vātvai puṇyā̍ya ।
re̱vatī̎stvā̱ vya̍kṣṇa̱nnitye̱tāḥ ॥ 7 ॥
sa̱ha varca̍sā̱ nava̍ ca ॥ 7 ॥))

[[2-8]]

आ॒यु॒ष्यं॑ व॒र्च॒स्य॑ꣳ सु॒वीर्य॑ꣳ रा॒यस्पो॒षमौद्भि॑द्यम्।
इ॒दꣳ हिर॑ण्यं॒ जैत्र्या॒याविशता॑ं माम्।
उ॒च्चैर्वा॑दि पृ॑तना॒जि स॑त्रासा॒हं धन॑ञ्जयम्।
सर्वा॒स्सम॒ृद्धीर्॒ ऋद्धयो॒ हिर॑ण्ये॒ऽस्मिन्थ्स॒माहि॑ताः।
शु॒नम॒हꣳ हिर॑ण्यस्य पि॒तुरि॑व॒ नामा॑ग्रभैषम्।
तं मा॒ हिर॑ण्यवर्च॒सं पू॒रुषु॑ प्रि॒यं कु॑रु।
प्रि॒यं मा॑ दे॒वेषु॑ कुरु प्रि॒यं मा॒ ब्रह्म॑णे कुरु।
प्रि॒यं वि॒श्ये॑षु शू॒द्रेषु॑ प्रि॒यꣳ राज॑सु मा कुरु।
या ति॒रश्ची॑ नि॒पद्य॑से॒ऽहं वि॒धर॑णी॒ इति॑।
तां त्वा॑ घृ॒तस्य॒ धार॑या॒ यजे॑ स॒ꣳराध॑नीम॒हम्।
स॒ꣳराध॑न्यै दे॒व्यै स्वाहा॑ प्र॒साध॑न्यै दे॒व्यै स्वाहा॑।
स॒म्राजं॑ च वि॒राजं॑ चाभि॒श्रीर्या॑ च॑ नो गृ॒हे।

ल॒क्ष्मी रा॒ष्ट्रस्य॒ या मुखे॒ तया॑ मा॒ सꣳ सृ॑जामसि।
शुभि॑के॒ शिर॒ आ रो॑ह॒ शो॒भय॑न्ती॒ मुखं॒ मम॑।
मुखꣳ॑ हि॒ मम॑ शोभय॒ भू॒याꣳ॑सं च॒ भग॑ं कुरु।
यामाह॑रज्ज॒मद॑ग्निश्श्र॒द्धायै॑ कामाया॒न्यै॑।
इ॒मां तामपि॑ नह्ये॒ऽहं भगे॑न स॒ह वर्च॑सा।
यदाञ्ज॑नं त्रैककु॒दं जा॒तꣳ हि॒मव॑त उ॒परि॑।
तेन॑ वामाञ्जे॒ तेज॑से॒ वर्च॑से॒ भगा॑य च॥ ८॥
स॒म्राध॑नीम॒हं नव॑ च॥ ८॥

((āyuṣyam̐ varcạsyam̐ sụvīryam̐ rāyaspoṣạmaudbhidyam |
ịdam̐ hiraṇyam jaitryāyāviśatāṃ mām |
ụccaịrvādi pṛtanāji satrāsāhaṃ dhanañjayam |
sarvāssamṛddhīr ṛddhayo hiraṇye'sminthsamāhitāḥ |
śụnamahaṃ hiraṇyasya piturivạ nāmāgrabhaiṣam |
taṃ mā hiraṇyavarcasaṃ pūruṣu priyaṃ kuru |
priyaṃ mā devẹṣu kuru priyaṃ mā brahmaṇe kuru |
priyaṃ viśyeṣu śūdreṣu priyam̐ rājasu mā kuru |
yā tiraści nipadyase'haṃ vidharaṇī iti |
tāṃ tvā ghṛtasya dhārayā yaje saṃrādhanīmaham |
saṃrādhanyai devyai svāhā prasādhanyai devyai svāhā |
samrājaṃ ca virājaṃ cābhiśrīryā ca no gṛhe |
lakṣmī rāṣṭrasya yā mukhe tayā mā sam̐ sṛjāmasi |
śubhike śira ā roha śobhayantī mukhaṃ mama |
mukham̐ hi mama śobhaya bhūyām̐saṃ ca bhagaṃ kuru |
yāmāharajjamadagniśśraddhāyai kāmāyānyai |
imāṃ tāmapi nahye'haṃ bhagena saha varcasā |
yadāñjanaṃ traikakudaṃ jātam̐ himavata upari |
tena vāmāñje tejase varcase bhagāya ca || 8 ||
saṃrādhanīmahaṃ nava ca || 8 ||))

[[2-9]]
मयि॑ पर्व॑तपूरु॒षं मयि॑ पर्व॑तवर्च॒सं मयि॑ पर्व॑तभेष॒जं मयि॑ पर्व॑तायुषम्।
यन्मे॒ वर्चः॑ प॒राग॑तमा॒त्मान॑मुप॒तिष्ठ॑ति।
इ॒दं तत्पुनरा॑द॑दे दी॒र्घायु॒त्वाय॒ वर्च॑से।
प्र॒ति॒ष्ठे स्थो॑ दे॒वता॑नां मा मा॒ संता॑प्तम्।
प्र॒जाप॑तेश्श॒रण॑मसि॒ ब्रह्म॑णश्छ॒दिर्वि॒श्वज॑नस्य॒ छा॒याऽसि॑ स॒र्वतो॑ मा पाहि।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वेऽश्विनो॑र्बा॒हुभ्यां॑ पू॒ष्णो ह॒स्ताभ्या॒माद॑दे द्वि॒षतो॒ व॒धायेन्द्र॑स्य॒ वज्रो॑ऽसि

वार्त्रघ्नश्शर्म मे भव यत्पापं तन्निवारय।
दिवीष्षदुर्वीरित्येषा।
राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषꣳ राष्ट्रभृदसि सम्राडासन्दी मा त्वद्योषꣳ राष्ट्रभृदस्यधिपत्न्यासन्दी मा त्वद्योषम्।
आपः पादावनेजनीर्द्विषन्तं नाशयन्तु मे।
अस्मिन्कुले ब्रह्मवर्चस्यसानि।
मयि महो मयि यशो मयीन्द्रियं वीर्यम्।
आमागन् यशसा वर्चसा सꣳसृज पयसा तेजसा च।
तं मां प्रियं प्रजानां कुर्वधिपतिं पशूनाम्।
विराजो दोहोऽसि विराजो दोहमशीय मम पद्याय विराज।
समुद्रं वः प्र हिणोमि स्वां योनिमपिगच्छत।
अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पयः॥ ९॥
असानि षट् च॥ ९॥

((mayi parvatapūruṣaṃ mayi parvatavarcasaṃ mayi parvatabheṣajaṃ mayi parvatāyuṣam |
yanme varcaḥ parāgatamātmānāmupatiṣṭhāti |
idaṃ tatpunarādāde dīrghāyutvāya varcase |
pratiṣṭhe stho devatānāṃ mā mā saṃtāptam |
prajāpateśśaraṇamasi brahmaṇaśchadirviśvajanasya chāyā'si sarvato mā pāhi |
devasya tvā savituḥ prasave'śvinorbāhubhyāṃ pūṣṇo hastābhyāmādāde dviṣato vadhāyendrasya vajrosi vārtraghnaśśarma me bhava yatpāpaṃ tannivāraya |
diviṣṣadurvīrityeṣā |
rāṣṭrabhṛdasyācāryāsandī mā tvadyoṣaṃ rāṣṭrabhṛdasi samrāḍāsandī mā tvadyoṣaṃ rāṣṭrabhṛdasyadhipatnyāsandī mā tvadyoṣam |
āpaḥ pādāvanejanīrdviṣantaṃ nāśayantu me |
asminkule brahmavarcasyasāni |
mayi maho mayi yaśo mayīndriyaṃ vīryam |
āmāgan yaśasā varcasā saṃsṛja payasā tejasā ca |
taṃ mā priyaṃ prajānāṃ kurvadhipatiṃ paśūnām |
virājo doho'si virājo dohamaśīya mama padyāya virāja |
samudraṃ vaḥ pra hiṇomi svāṃ yonimapigacchata |
acchidraḥ prajayā bhūyāsaṃ mā parāseci matpayaḥ || 9 ||
asāni ṣaṭ ca || 9 ||))

[[2-10]]
त्रय्यै विद्यायै यशोऽसि यशसो यशोऽसि ब्रह्मणो दीप्तिरसि।

तं मा॑ प्रि॒यं प्र॒जाना॑ं कु॒र्वधि॑पतिं पशू॒नाम्।
आ मा॑ ग॒न्नित्ये॒षा।
अ॒मृ॒तो॒प॒स्तर॑णमस्य मृतापिधा॒नम॑सि।
यन्मधु॑नो मध॒व्य॑ं पर॒मम॒न्नाद्य॑ं वी॒र्य॑म्।
तेना॒हं मधु॑नो मध॒व्ये॑न पर॒मेणा॒न्नाद्ये॑न वी॒र्ये॑ण पर॒मो॑ऽन्ना॒दो म॑ध॒व्यो॑ऽसानि।
गौर॒स्यप॑हतपा॒प्माऽप॑ पा॒प्मान॑ं जहि॒ मम॑ चा॒मुष्य॑ च।
अ॒ग्निः प्राश्ना॑तु प्रथ॒मस्स हि वेद॒ यथा॑ ह॒विः।
अरि॑ष्टम॒स्माक॑ं कृ॒ण्वन्ब्रा॑ह्म॒णो ब्रा॑ह्म॒णेभ्य॑ः।
य॒ज्ञो व॑र्धतां य॒ज्ञस्य॑ वृ॒द्धिमनु॑ व॒र्धाऽप॑ चिति॒र॒स्यप॑चितं मा कु॒र्वप॑चितो॒ऽहं म॑नु॒ष्ये॑षु भूयासम्।
गौर्धे॑नुभ॒व्या मा॒ता रु॒द्राणा॑ं दुहि॒ता वसू॑ना॒ꣳ स्वसा॑ऽऽदि॒त्याना॑म॒मृत॑स्य॒ नाभि॑ः।
प्रणु॒ वोच॑ं चिकि॒तुषे॒ जना॑य॒ मा गामना॑गा॒मदि॑तिं वधिष्ट।
पिब॑तूद॒कं तृणा॑न्यत्तु।
ओमुथ्सृ॒जत।
भू॒तम्।
सा वि॒राट् तन्मा क्षा॑यि॒ तस्य॒ तेऽशी॑य॒ तन्म॒ ऊर्ज॑ं धाः।
ओं कल्प॒यत॥ १०॥
भू॒या॒स॒ꣳ॒सप्त च॑॥ १०॥

((tr̲ayyai vi̲dyāyai̲ yaśȯ'si̲ yaśȧso̲ yaśȯ'si̲ brahmȧṇo̲ dīptirasi |
taṃ mȁ pri̲yaṃ pra̲jānāṁ ku̲rvadhipatiṃ paśu̲nām |
ā mȧ ga̲nnitye̲ṣā |
a̲mr̥̲to̲pa̲staraṇamasya mr̥tāpidhā̲namȧsi |
yanmadhȧno madha̲vyaṁ para̲mama̲nnādyaṁ vi̲ryȧm |
tenā̲haṃ madhȧno madha̲vyėna para̲meṇā̲nnādyėna vi̲ryėṇa para̲mȍ'nnā̲do mȧdha̲vyȯ'sāni |
gaura̲syapȧhatapā̲pmā'pȧ pā̲pmānaṁ jahi̲ mamȧ cā̲muṣyȧ ca |
a̲gniḥ prāśnȧtu pratha̲massa hi veda̲ yathȧ ha̲viḥ |
ariṣṭama̲smākaṁ kr̥̲ṇvanbrȁhma̲ṇo brȁhma̲ṇebhyȧḥ |
ya̲jño vȧrdhatāṃ ya̲jñasya̲ vr̥ddhi̲manȧ va̲rdhā'pȧ citira̲syapȧcitaṃ mā ku̲rvapȧcito̲'haṃ mȧnu̲ṣyėṣu bhūyāsam |
gaurdhėnubha̲vyā mā̲tā ru̲drāṇāṁ duhi̲tā vasȧnā̲ṁ svasȧ''di̲tyānȧma̲mr̥tȧsya̲ nābhiḥ |
praṇu̲ vocaṁ ciki̲tuṣe̲ janȧya̲ mā gāmanȧgā̲maditiṃ vadhiṣṭa̲ |
pibȧtūda̲kaṃ tr̥̲ṇȁnyattu |
omuthsr̥̲jata |
bhu̲tam |

sā virāṭ tanmā kṣāyi tasya te'śiya tanma ūrjam̐ dhāḥ |
oṃ kalpayata || 10 ||
bhūyāsam̐sapta ca || 10 ||))

[[2-11]]
धाता ददातु नो रयिमिति चतस्रो यस्त्वा हृदा कीरिणेति चतस्रः।
भूर्भुवस्सुवो राकामहं यास्ते राके।
यौगन्धरिरेव नो राजेति साल्वीरवादिषुः।
विवृत्तचक्रा आसीनास्तीरेण यमुने तव।
सोम एव नो राजेत्याहुर्ब्राह्मणीः प्रजाः।
विवृत्तचक्रा आसीनास्तीरेणासौ तव।
पुꣳसुवनमसि।
आभिष्ट्वाऽहं दशभिरभिमृशामि दशमासयाय सूतवे।
यथैव सोमः पवते यथा समुद्र एजति।
एवं ते गर्भ एजतु सह जरायुणा निष्क्रम्य प्रतितिष्ठत्वायुषि ब्रह्मवर्चसि यशसि वीर्येऽन्नाद्ये।
दशमासांच शयानो धात्रा हि तथा कृतम्।
ऐतु गर्भो अक्षतो जीवो जीवन्त्याः।
आयमनीर्यमयत गर्भमापो देवीस्सरस्वतीः।
ऐतु गर्भो अक्षतो जीवो जीवन्त्याः।
तिलदेऽव पद्यस्व न माꣳसमसि नोदलम्।
स्थवित्र्यवपद्यस्व न माꣳसेषु न स्नावसु न बद्धमसि मज्जसु।
निरैतु पृश्नि शेवलꣳ शुने जराय्वत्तवे॥ ११॥
अन्नाद्ये सप्त च॥ ११॥

((dhātā dadātu no rayimiti catasro yastvā hṛdā kīriṇeti catasraḥ |
bhūrbhuvassuvo rākāmaham yāste rāke |
yaugandharireva no rājeti sālvīravādiṣuḥ |
vivṛttacakrā āsīnāstīreṇa yamune tava |
soma eva no rājetyāhurbrāhmaṇīḥ prajāḥ |
vivṛttacakrā āsīnāstīreṇāsau tava |
pum̐suvanamasi |
ābhiṣṭvā'ham daśabhirabhimṛśāmi daśamāsayāya sūtave |
yathaiva somaḥ pavate yathā samudra ejati |
evaṃ te garbha ejatu saha jarāyuṇā niṣkramya pratitiṣṭhatvāyuṣi brahmavarcasi
yaśasi vīrye'nnādye |

daśa̱māsā̱m̐ca śa̍yāno dhā̱trā hi tatha̍ kr̥̱tam ।
aitu̱ garbho̱ akṣa̍to jī̱vo jīva̍ntyāḥ ।
ā̱yama̍nīryamayata̱ garbha̱māpo̍ devī̱ssara̍svatīḥ ।
aitu̱ garbho̱ akṣa̍to jī̱vo jīva̍ntyāḥ ।
tila̱de'va̍ padyasva̱ na mā̱m̐samasi̱ nodalam̐ ।
sthavi̱tryava̍padyasva̱ na mā̱m̐seṣu̱ na snāva̍su̱ na ba̱ddhama̍si ma̱jjasu̍ ।
nira̍itu̱ pr̥śni̱ śeva̍lam̐ śu̱ne ja̱rāyvatta̱ve̎ ॥ 11 ॥
a̱nnādye̍ sa̱pta ca̍ ॥ 11 ॥))

[[2-12]]
दि॒वस्परी॒त्ये॑षो॑ऽनु॒वा॒कः।
अ॒स्मि॒न्नह॒ꣳ स॒हस्रं॑ पुष्या॒म्येध॑मान॒स्स्वे व॒शे॑।
अङ्गा॑दङ्गा॒थ्सं भ॑वसि॒ हृद॑या॒दधि॑ जायसे।
आ॒त्मा वै पु॒त्रनामा॑ऽसि॒ स जी॑व श॒रद॑श्श॒तम्।
अश्मा॑ भव पर॒शुर्भ॑व॒ हिर॑ण्य॒मस्तृ॑तं भव।
प॒शूनां॑ त्वा॑ हिंका॒रेणा॒भिजि॑घ्राम्यसौ॑।
मे॒धां ते॑ दे॒वस्स॑वि॒ता मे॒धां दे॒वी सर॑स्वती।
मे॒धां ते॑ अ॒श्विनौ॑ दे॒वावाध॑त्तां॒ पुष्क॑रस्रजा।
त्वयि॑ मे॒धां त्वयि॑ प्र॒जां त्व॒य्य॒ग्निस्तेजो॑ दधातु॒ त्वयि॑ मे॒धां त्वयि॑ प्र॒जां त्वयीन्द्र॑ इन्द्रि॒यं द॑धातु॒ त्वयि॑ मे॒धां त्वयि॑ प्र॒जां त्व॒यि॒ सूर्यो॑ भ्राजो॑ दधातु।
क्षे॒त्रि॒यै त्वा॒ निर्‍ऋ॑त्यै त्वा द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त्।
अ॒ना॒ग॒सं ब्रह्म॑णे त्वा करोमि शि॒वे ते॒ द्यावा॑पृथि॒वी उ॒भे इ॒मे।
शं ते॑ अ॒ग्निस्स॒हाद्भिर॑स्तु॒ शं द्यावा॑पृथि॒वी स॒हौष॑धीभिः।
शम॒न्तरि॑क्षꣳ स॒ह वाते॑न ते॒ शं ते॒ चत॑स्रः प्र॒दिशो॑ भवन्तु।
या दैवी॒श्चत॑स्रः प्र॒दिशो॒ वात॑पत्नीर॒भि सूर्यो॑ विच॒ष्टे।
तासां॑ त्वाऽऽज॒रस॒ आ द॑धामि॒ प्र यक्ष्म॑ ए॒तु निर्‍ऋ॑तिं परा॒चैः।
अमो॑चि॒ यक्ष्मा॑द्दुरि॒ताद॑व॒र्त्यै द्रु॒हः पाशा॒न्निर्‍ऋ॑त्यै॒ चोद॑मोचि।
अहा॒ अव॑र्ति॒मवि॑दथ्स्यो॒नमप्य॑भूद्भ॒द्रे सु॑कृ॒तस्य॑ लो॒के।
सूर्य॑मृ॒तं तम॑सो॒ ग्राह्या॒ यद्दे॒वा अमु॑ञ्च॒न्नसृ॑ज॒न्व्ये॑नसः।
ए॒वम॒हमि॒मं क्षे॑त्रि॒याज्जा॑मिश॒ꣳसाद्द्रुहो॒ मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त्।
भूस्स्वाहा॒ भुव॒स्स्वाहा॒ सुव॒स्स्वाहो॒ꣳ स्वाहा॑॥ १२॥
पाशा॒दोꣳ स्वाहा॑॥ १२॥

((di̱vaspari̱tye̱ṣo̍'nuvā̱kaḥ ।
a̱sminna̱haṃ̐ sa̱hasraṃ̍ puṣyā̱myedha̍mānā̱ssve vaśe̎ ।
aṅgā̍daṅgā̱thsaṃ bha̍vasi̱ hṛda̍yā̱dadhi̍ jāyase ।
ā̱tmā vai pu̍tra̱nāmā̍'si̱ sa jī̍va śa̱rada̍śśa̱tam ।
aśmā̍ bhava para̱śurbha̍va̱ hira̍ṇya̱mastṛ̍taṃ bhava ।
pa̱śū̱nāṃ tvā̍ hiṃkā̱reṇā̱bhiji̍ghrāmyasau ।
me̱dhāṃ te̍ de̱vassa̍vi̱tā me̱dhāṃ de̱vī sara̍svatī ।
me̱dhāṃ te̍ a̱śvinau̍ de̱vāvādha̍ttā̱ṃ puṣka̍rasrajā ।
tvayi̍ me̱dhāṃ tvayi̍ pra̱jāṃ tvayya̱gnistejo̍ dadhātu̱ tvayi̍ me̱dhāṃ tvayi̍ pra̱jāṃ
tvayīndra̍ indri̱yaṃ da̍dhātu̱ tvayi̍ me̱dhāṃ tvayi̍ pra̱jāṃ tvayi̱ suryo̱ bhrājo̍ dadhātu ।
kṣe̱tri̱yai tvā̱ nirṛ̍tyai tvā dru̱ho mu̍ñcāmi̱ varu̍ṇasya̱ pāśā̎t ।
a̱nā̱gasa̱ṃ brahma̍ṇe tvā karomi śi̱ve te̱ dyāvā̍pṛthi̱vī u̱bhe i̱me ।
śaṃ te̍ a̱gnissa̱hādbhira̍stu̱ śaṃ dyāvā̍pṛthi̱vī sa̱hauṣa̱dhībhiḥ̍ ।
śama̱ntari̍kṣaṃ̐ sa̱ha vāte̍na te̱ śaṃ te̱ cata̍sraḥ pra̱diśo̍ bhavantu ।
yā daivī̱ścata̍srah pra̱diśo̱ vāta̍patnīra̱bhi suryo̍ vica̱ṣṭe ।
tāsā̎ṃ tvā''ja̱rasa̱ ā da̍dhāmi̱ pra yakṣma̍ etu̱ nirṛ̍tiṃ parā̱caiḥ ।
amo̍ci̱ yakṣmā̎dduri̱tādava̍rtyai dru̱haḥ pāśā̱nnirṛ̍tyai̱ coda̍moci ।
ahā̱ ava̍rti̱mavi̍dathsyo̱nama̱pya̍bhūdbha̱dre su̍kṛ̱tasya̍ lo̱ke ।
sūrya̍mṛ̱taṃ tama̍so̱ grāhyā̱ yadde̱vā amu̍ñca̱nnasṛ̍ja̱nvye̍nasaḥ ।
e̱vama̱hami̱maṃ kṣe̎tri̱yājjā̍miśa̱ṃ̐sāddru̱ho mu̍ñcāmi̱ varu̍ṇasya̱ pāśā̎t ।
bhūssvāhā̱ bhuva̱ssvāhā̱ suva̱ssvāhoṃ̐ svāhā̎ ॥ 12 ॥
pāśā̱doṃ̐ svāhā̎ ॥ 12 ॥))

[[2-13]]

मा ते᳚ कुमा॒रꣳ रक्षो᳚ वधी॒न्मा धे॒नुर॑त्यासा॒रिणी᳚।
प्रि॒या धन॑स्य भूया॒ एध॑माना॒ स्वे गृ॒हे।
अ॒यं कु॑मा॒रो ज॒रां ध॑यतु दी॒र्घमायु॑ः।
यस्मै॒ त्वꣳ स्तन॒ प्राप्या॒या॒युर्वर्चो॒ यशो॒ बल᳚म्।
यद्भू॒मेर्हृद॑यं दि॒वि च॒न्द्रम॑सि श्रि॒तम्।
तद॑र्विं पश्य॒ं माऽहं पौत्र॒मघ॑ꣳ रुदम्।
यत्ते᳚ सुसी॒मे हृद॒यं वेदा॒हं तत्प्र॒जाप॑तौ।
वेदा॑म॒ तस्य॑ ते व॒यं माऽहं पौत्र॒मघ॑ꣳ रुदम्।
नाम॑यति॒ न रु॑दति॒ यत्र॑ व॒यं व॑दामसि॒ यत्र॑ चा॒भिमृ॑शामसि।
आप॑स्सु॒प्तेषु॑ जाग्र॒त रक्षा॑ꣳसि॒ निरि॒तो नु॑दध्वम्।
अ॒यं क॒लिं प॒तय॑न्तꣳ श्वा॒नमि॒वोद्वृ॑द्धम्।
अ॒जां वाशि॑तामिव मरु॒तः पर्यी᳚ध्व॒ꣳ स्वाहा᳚।
शण्डे॒रथ॒श्शण्डि॑केर उलूख॒लः।

च्यव॑नो॒ नश्य॑तादि॒तस्स्वाहा᳚।
अ॒यश्शण्डो॒ मर्क॑ उप॒वीर॑ उलू॒खलः॑।
च्यव॑नो॒ नश्य॑तादि॒तस्स्वाहा᳚।
के॒शिनी॒श्श्वलो॒मिनी॒ः खजा॑पो॒ऽजोप॑काशिनीः।
अपे॑त॒ नश्य॑तादि॒तस्स्वाहा᳚।
मि॒श्रवा॑ससः कौबेर॒का र॑क्षोरा॒जेन॒ प्रेषि॑ताः।
ग्राम॒ꣳ॒ सजा॑नयो गच्छन्ती॒च्छन्तो॑ऽपरि॒दाकृ॒तान्थ्स्वाहा᳚।
ए॒तान् घ्न॑तै॒तान्गृ॑ह्णी॒तेत्य॒यं ब्रह्म॑णस्पु॒त्रः।
ता॒नग्निः पर्य॑सर॒त्तानिन्द्र॒स्तान्बृ॒हस्पति॑ः।
ता॒नहं॒ वे॑द ब्राह्म॒णः प्र॑मृश॒तः कू॑टद॒न्तान् वि॑के॒शान्लम्ब॑नस्त॒नान्थ्स्वाहा᳚॥ १३॥
निरि॒तो नु॑दध्व॒ꣳ॒ स्वाहा॒ त्रीणि॑ च॥ १३॥

((mā tè kumā̱ram̐ rakṣò vadhī̱nmā dhe̱nuràtyāsā̱riṇï̱ |
pri̱yā dhanàsya bhūyā̱ edhàmānā̱ sve gṟhe |
a̱yaṃ kùmā̱ro ja̱rāṃ dhàyatu dī̱rghamāyùḥ |
yasmai̱ tvam̐̈ stana̱ prāpyā̱yāyu̱rvarco̱ yaśo̱ balä̀m |
yadbhūme̱rhṛdàyaṃ di̱vi ca̱ndramàsi śri̱tam |
tadùrvi paśyaṃ̱ mā'haṃ pautra̱magham̐̈ rudam |
yattè susī̱me hṛdàyaṃ̱ vedā̱haṃ tatpra̱jāpàtau |
vedàma̱ tasyà te va̱yaṃ mā'haṃ pautra̱magham̐̈ rudam |
nāmàyati̱ na rùdati̱ yatrà va̱yaṃ vàdāmasi̱ yatrà cā̱bhimṛ̀śāmasi |
āpàssu̱pteṣu̱jāgrata̱ rakṣām̐̀si̱ niri̱to nùdadhvam |
a̱yaṃ ka̱liṃ pa̱tayàntam̐̈ śvā̱nami̱vodvṛ̀ddham |
a̱jāṃ vāśì̱tāmiva marutaḥ paryä̀dhva̱m̐̈ svāhä̀ |
śa̱ṇḍe̱ratha̱śśa̱ṇḍìkera ulūkha̱laḥ |
cyavàno̱ naśyàtādi̱tassvāhä̀ |
aya̱śśa̱ṇḍo̱ markà upa̱vīrà ulūkha̱laḥ |
cyavàno̱ naśyàtādi̱tassvāhä̀ |
ke̱śinī̱śśvalo̱minī̱ḥ khajàpo̱'jopàkāśinīḥ |
apèta̱ naśyàtādi̱tassvāhä̀ |
mi̱śravàsasaḥ kaubera̱kā ràkṣorā̱jena̱ preṣìtāḥ |
grāma̱m̐̈ sajànayo gacchantī̱cchantò'pari̱dākṛ̱tānthsvāhä̀ |
e̱tān ghnàtai̱tāngṛ̀hṇī̱tetya̱yaṃ brahmàṇaspu̱traḥ |
tāna̱gniḥ paryàsara̱ttānindra̱stānbṛha̱spatìḥ |
tāna̱haṃ vèda brāhma̱ṇaḥ pràmṛśa̱taḥ kùṭada̱ntān vìke̱śānlàmbanasta̱nānthsvāhä̀ ||
13 ||
niri̱to nùdadhva̱m̐̈ svāhā̱ trīṇi̱ ca || 13 ||))

[[2-14]]

न॒क्तं॒चा॒रिण॑ उरस्पे॒शाञ्छूल॑ह॒स्तान्क॑पाल॒पान्।
पूर्व॑ ए॒षां पि॒तेत्यु॒च्चैश्श्रा॒॑व्यक॒र्णक॑ः।
माता॒ ज॑घ॒न्या॑ सर्प॑ति॒ ग्रामे॑ विधु॒रमि॒च्छन्ती॒ स्वाहा॓।
नि॒शी॒थ॒चा॒रिणी॒ स्वसा॑ स॒न्धिना॒ प्रेक्षे॑ते॒ कुला॓म्।
या स्वप॑न्तं बो॒धय॑ति॒ यस्यै॑ वि॒जा॑ताया॒ं मन॑ः।
तासा॒ं त्वं कृ॒ष्ण॒वर्त्म॑ने क्लो॒मान॒ꣳ हृद॑य॒ं यकृ॑त्।
अग्ने॒ अक्षी॑णि नि॒र्दह॒ स्वाहा॓।
अङ्गा॑दङ्गा॒थ्संभ॑वसि॒ हृद॑या॒दधि॑ जायसे।
वे॒दो वै पु॑त्र॒नामा॑ऽसि॒ स जी॑व श॒रद॑श्श॒तम्।
अश्मा॑ भ॒वेत्ये॒षा।
अ॒ग्निरायु॑ष्मा॒निति॒ पञ्च॑।
सर्व॑स्मादा॒त्मन॒स्संभू॑ताऽसि॒ सा जी॑व श॒रद॑श्श॒तम्।
भूर॒पां त्वौष॑धीना॒ꣳ रस॒ं प्राश॑यामि शि॒वास्त॒ आप॒ ओष॑धयस्सन्त्वनमी॒वास्त॒ आप॒
ओष॑धयस्सन्त्वसौ।
भुवो॒ऽपाꣳ सुव॑र॒पां भूर्भु॑वस्सुव॑र॒पां त्वौष॑धीना॒ꣳ रस॒ं प्राश॑यामि शि॒वास्त॒ आप॒
ओष॑धयस्सन्त्वनमी॒वास्त॒ आप॒ ओष॑धयस्सन्त्वसौ।
उ॒ष्णेन॑ वायवु॒दके॒नेत्ये॒ष॥ १४॥
ए॒षा पञ्च॑ च॥ १४॥

((naktaṃcāriṇa uraspeśāñchūlahastānkapālapān ।
pūrva eṣāṃ pitetyuccaiśśrāvyakarṇakaḥ ।
mātā jaghanyā sarpati grāme vidhuramicchantī svāhā ।
niśīthacāriṇī svasā sandhinā prekṣete kulām ।
yā svapantaṃ bodhayati yasyai vijātāyāṃ manaḥ ।
tāsāṃ tvaṃ kṛṣṇavartmane klomānam̐ hṛdayaṃ yakṛt ।
agne akṣiṇi nirdaha svāhā ।
aṅgādaṅgāthsaṃbhavasi hṛdayādadhi jāyase ।
vedo vai putranāmā'si sa jīva śaradaśśatam ।
aśmā bhavetyeṣā ।
agnirāyuṣmāniti pañca ।
sarvasmādātmanassaṃbhūtā'si sā jīva śaradaśśatam ।
bhūrapāṃ tvauṣadhīnām̐ rasaṃ prāśayāmi śivāsta āpa oṣadhayassantvanamīvāsta
āpa oṣadhayassantvasau ।
bhuvo'pām̐ suvarapāṃ bhūrbhuvassuvarapāṃ tvauṣadhīnām̐ rasaṃ prāśayāmi
śivāsta āpa oṣadhayassantvanamīvāsta āpa oṣadhayassantvasau ।
uṣṇena vāyavudakenetyeṣa ॥ 14 ॥

e̱ṣā pañca̍ ca || 14 ||))

[[2-15]]
यद्भूमेः᳚ क्रू॒रं तदि॒तो ह॑रामि॒ परा॑ची॒ं निर्ऋ᳚ति॒ं निर्वा᳚हयामि।
इ॒दꣳ श्रेयो᳚ऽव॒सान॒माग॑न्म दे॒वा गोम॒दश्वा॑वदि॒दम॑स्तु॒ प्र भूम॑।
स्यो॒ना पृ॑थिवि॒ भवा॑नृक्ष॒रा नि॒वेश॑नी।
यच्छा॑ न॒श्शर्म᳚ स॒प्रथाः᳚।
इ॒हैव ति॑ष्ठ॒ निमि॑ता॒ तिल्व॑ला स्या॒दिरा॑वती।
मध्ये॒ ताल्प्य॑स्य॒ तिष्ठा॒न्मा त्वा॒ प्राप॑न्नघा॒यव॑ः।
आ त्वा॑ कुमा॒रस्तरु॑ण॒ आ व॒थ्सो जग॑ता स॒ह।
आ त्वा॑ परि॒स्रुत॑ः कु॒म्भा आ द॒ध्नः कल॑शीरयन्न्।
ऋ॒तेन॒ स्थूणा॑व॒धिरो᳚ह व॒ꣳ॒शोग्रो वि॒राज॒न्नप॑से॒ध शत्रू॑न्।
ब्रह्म॑ च ते क्ष॒त्रं च॒ पूर्वे᳚ स्थूणे॑ अ॒भि र॑क्षतु।
य॒ज्ञश्च॒ दक्षि॑णाश्च॒ दक्षि॑णे।
इ॒षश्चो॒र्जश्चाप॑रे।
मि॒त्रश्च॒ वरु॑ण॒श्चोत्त॑रे।
ध॒र्मस्ते॒ स्थूणा॑ राज॒श्श्रीस्ते॒ स्तूप॑ः।
उ॒द्ध्रि॒यमा॑ण॒ उद्ध॑र पा॒प्मनो᳚ मा॒ यद॑विद्वा॒न्॒ यच्च॑ वि॒द्वाꣳश्च॒कार॑।
अह्ना॒ यदेन॑ः कृ॒तम॑स्ति पा॒पꣳ रात्र्या॒ यदेन॑ः कृ॒तम॑स्ति पा॒पꣳसर्व᳚स्मा॒न्मोद्धृ॒तो मु॒ञ्च तस्मा᳚त्।
इन्द्र॑स्य गृ॒हा वसु॑मन्तो वरू॒थिन॒स्ता॒नहꣳ सु॒मन॑स॒ः प्रप॑द्ये।
अ॒मृ॒ता॒हु॒तिम॒मृता॑यां जुहो॒म्य॒ग्निं पृ॑थि॒व्याम॒मृत॑स्य॒ जित्यै᳚।
तया॑ऽन॒न्तं काम॑म॒हं ज॑यानि प्र॒जाप॑ति॒र्यं᳚ प्र॑थ॒मो जि॒गाया॒ग्निम॑ग्नौ॒ स्वाहा᳚।
अन्न॑पत॒ इत्ये॒षा।
अरि॑ष्टा अ॒स्माकं᳚ वी॒रास्स॑न्तु॒ मा परा॑सेचि मे॒ धन᳚म्।
भू॒मि॒र्भूमि॑मगान्मा॒ता मा॒त॒रमप्य॑गात्।
भू॒यास्म॑ पु॒त्रैः प॒शुभि॒र्यो᳚ नो॒ द्वेष्टि॒ स भि॑द्यताम्।
वास्तो᳚ष्पत॒ इति॒ द्वे।
वास्तो᳚ष्पते प्र॒तर॑णो न एधि॒ गोभि॒रश्वे᳚भिरिन्दो।
अ॒जरा॑सस्ते स॒ख्ये स्या॑म पि॒तेव॑ पु॒त्रान् प्रति॑ नो जुषस्व।
अ॒मी॒व॒हा वस्तो᳚ष्पते॒ विश्वा॑ रू॒पाण्या॑वि॒शन्।

सखासु शेव एधि नः।
शिवꣳशिवम्॥ १५॥
अभिरक्षत्वेषा नव च॥ १५॥

((yadbhūmēḥ krūraṃ tadito harāmi parācīṃ nirṛtiṃ nirvāhayāmi |
idam̐ śreyo'vasānamāganma devā gomadaśvāvadidamastu pra bhūma |
syonā pṛthivi bhavānṛkṣarā niveśanī |
yacchā naśśarma saprathāḥ |
ihaiva tiṣṭha nimitā tilvalā syādirāvatī |
madhye tālpyasya tiṣṭhānmā tvā prāpannaghāyavaḥ |
ā tvā kumārastaruṇa ā vathso jagatā saha |
ā tvā parisrutaḥ kumbhā ā dadhnaḥ kalaśīrayann |
ṛtena sthūṇāvadhiroha vam̐śogro virājannapasedha śatrūn |
brahma ca te kṣatraṃ ca pūrve sthūṇe abhi rakṣatu |
yajñaśca dakṣiṇāśca dakṣiṇe |
iṣaścorjaścāpare |
mitraśca varuṇaścottare |
dharmaste sthūṇā rājaśśrīste stūpaḥ |
uddhriyamāṇa uddhara pāpmano mā yadavidvān yacca vidvām̐ścakārā |
ahnā yadenaḥ kṛtamasti pāpam̐ rātryā yadenaḥ kṛtamasti pāpam̐sarvasmānmoddhṛto
muñca tasmāt |
indrasya gṛhā vasumanto varūthinastānaham̐ sumanasaḥ prapadye |
amṛtāhutimamṛtāyāṃ juhomyagniṃ pṛthivyāmamṛtasya jityai |
tayā'nantaṃ kāmamahaṃ jayāni prajāpatiryaṃ prathamo jigāyāgnimagnau svāhā |
annapata ityeṣā |
ariṣṭā asmākaṃ vīrāssantu mā parāseci me dhanām |
bhūmirbhūmimagānmātā mātaramapyagāt |
bhūyāsma putraiḥ paśubhiryo no dveṣṭi sa bhidyatām |
vāstōṣpata iti dve |
vāstōṣpate prataraṇo na edhi gobhiraśvebhirindo |
ajarāsaste sakhye syāma piteva putrān prati no juṣasva |
amīvahā vastōṣpate viśvā rūpāṇyāviśan |
sakhāsu śeva edhi naḥ |
śivam̐śivam || 15 ||
abhirakṣatveṣā nava ca || 15 ||))

[[2-16]]
कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः।
उपरिष्टाद्यदेजाय तृतीयस्या इतो दिवः।
औलब इत्तमुपाह्वयथार्जीञ्छ्यामरश्शबलः।
अधोराम उलुम्बलः सारमेयोह धावति समुद्रमवचाकशत्।

बि॒भ्रन्नि॒ष्कं॑ च रु॒क्मं च॒ शुना॒मग्र॑ꣳ सुबी॒रि॒णः।
सु॒बी॑रि॒ण सृ॒जसृ॒ज शु॒न॑क सृ॒जैक॑व्रा॒त्य सृ॒ज॒च्छत्।
त॒थ्स॒त्यं यत्त्वेन्द्रो॑ऽब्रवी॒द्गास्स्पा॑श॒य॒स्वेति॒ तास्त्व॑ꣳ स्पा॑श॒यि॒त्वाऽऽग॑च्छ॒स्तं त्वा॑ऽब्रवी॒द॒विं॑द॒ हा ३
इत्य॑विंद॒ꣳ हीति॒ व॑रं वृ॒णी॒ष्वेति॑ कु॒मा॒रमे॒वाहं व॑रं वृ॒ण इत्य॑ब्रवीः।
वि॒गृह्य॑ बा॒हू प्ल॒वसे॒ द्याम॑व॒चाक॑शत्।
बि॒भ्रन्नि॒ष्कं॑ च रु॒क्मं च॒ शुना॒मग्र॑ꣳ सुबी॒रि॒णः।
सु॒बी॑रि॒ण सृ॒जसृ॒ज शु॒न॑क सृ॒जैक॑व्रा॒त्य सृ॒ज॒च्छत्।
त॒थ्स॒त्यं यत्ते॑ स॒रमा मा॒ता लोहि॑तः पि॒ता।
अ॒मी एके॑ सर॒स्य॒का अ॑व॒धाव॑त तृ॒तीय॑स्या इ॒तो दि॒वः।
तेर्क॑श्च ससरम॒तण्डश्च॒ तूल॑श्च॒ वि॒तू॑ल॒श्चार्जु॑नश्च॒ लोहि॑तश्च।
दु॒ला ह॒ नाम॑ वो मा॒ता मन्था॑कको ह॑ वः पि॒ता।
स॒ं तक्षा॑ हन्ति॒ च॒क्री वो॒ न सीस॑रीदत।
छद॒पेहि॑ सीसरम सारमे॒य नम॑स्ते अस्तु सीसर।
सम॑श्वा॒ वृष॑णः प॒दो न सीस॑रीदत।
छद॒पेहि॑ सीसरम सारमे॒य नम॑स्ते अस्तु सीसर।
श्वा॒नमि॒च्छ्वाऽदन्न पु॑रु॒षञ्छत्।
ए॒ते॒ ते॒ प्रति॑दृश्येते सम॒ानव॑सने उ॒भे।
ते अ॒हꣳ सा॒रये॑ण मुस॑ले॒नाव॑हन्म्युलुख॑ले।
ह॒तश्शा॒ङ्खो॑ ह॒तश्शा॑ङ्खपिता ह॒तश्शा॑ङ्खकुतु॒र्व॑कः।
अप्ये॑षाꣳ स्थ॒पति॑र्ह॒तः।
ऋषि॑र्बो॒धः प्रबो॑ध॒स्स्वप्नो॑ मात॒रिश्वा॑।
ते ते॑ प्रा॒णान्थ्स्प॑रि॒ष्यन्ति॒ मा भै॑षी॒र्न म॑रि॒ष्यसि॑।
ज॒ग्धो मश॑को ज॒ग्धा वि॒तृ॑ष्टि॒र्ज॒ग्धो व्य॑ध्व॒रस्स्वाहा॑।
ज॒ग्धो व्य॑ध्व॒रो ज॒ग्धो मश॑को ज॒ग्धा वि॒तृ॑ष्टि॒स्स्वाहा॑
ज॒ग्धा वि॒तृ॑ष्टि॒र्ज॒ग्धो व्य॑ध्व॒रो ज॒ग्धो मश॑क॒स्स्वाहा॑॥ १६॥
सृ॒ज॒च्छदु॒भे अ॒ष्टौ च॑॥ १६॥

((kūrkur̲aḥ sukṻrkur̲aḥ kṻkur̲o vàlabandh̲anaḥ |
u̲pariṣṭ̲ādyadejàya tr̲tīyàsyā i̲to di̲vaḥ |
aulàba̲ ittamupā̈hvayathā̲rjīñchyā̲maśśa̲baláḥ |
a̲dhoràma ulumba̲laḥ sàrame̲yoha̲ dhāvàti samu̲dramàva̲cākàśat |

bi̱bhranniṣkaṁ ca ru̱kmaṃ ca̱ śuṉāmagraṁ̐ subīri̱ṇaḥ |
subi̍riṇa̱ sṛja̱sṛja̱ śuna̍ka̱ sṛjaika̍vrātya̱ sṛja̱cchat |
tathsa̱tyaṃ yattvendro̎'bravī̱dgāsspa̎śaya̱sveti̱ tāstvaṁ̐̎ spa̍śayi̱tvā''ga̍ccha̱stam
tva̎'bravī̱davi̍da̱ hā 3 ityavi̍da̱ṁ̍hīti̱ vara̍ṁ vṛ̱ṇī̱ṣveti̍ kumā̱rame̱vāhaṃ vara̍ṁ vṛ̱ṇa̱ ityabravī̱ḥ |
vi̱gṛhya̍ bā̱hū pla̱vase̱ dyāma̍va̱cāka̍śat |
bi̱bhranniṣkaṁ ca ru̱kmaṃ ca̱ śuṉāmagraṁ̐ subīri̱ṇaḥ |
subi̍riṇa̱ sṛja̱sṛja̱ śuna̍ka̱ sṛjaika̍vrātya̱ sṛja̱cchat |
tathsa̱tyaṃ yatte̍ sara̱mā mā̱tā lohi̍taḥ pi̱tā |
a̱mī eke̍ sarasya̱kā a̍va̱dhāva̍ta tṛ̱tīya̍syā i̱to di̱vaḥ |
teka̍śca sasaramata̱ṇḍaśca̱ tūla̍śca̱ vitu̍la̱ścārju̍naśca̱ lohi̍taśca |
du̱lā ha̱ nāma̍ vo mā̱tā mantha̍ka̱ko ha̍ vaḥ pi̱tā |
sa̱ṃ takṣa̍ hanti ca̱krī vo̱ na sīsa̍rīdata |
chada̱pehi̍ sīsarama sārameya̱ nama̍ste astu sīsara |
sama̍śvā̱ vṛṣa̍ṇaḥ pa̱do na sīsa̍rīdata |
chada̱pehi̍ sīsarama sārameya̱ nama̍ste astu sīsara |
śvāna̱micchvā'da̱nna pu̍ruṣa̱ñchat |
e̱te te̱ prati̍dṛśyete samā̱navā̍sane u̱bhe |
te a̱haṁ̐ sāraye̍ṇa̱ musa̍le̱nāva̍hanmyu̱lūkha̍le |
ha̱taśśa̱ṅkho ha̱taśśa̍ṅkhapi̱tā ha̱taśśa̍ṅkhakuturva̱kaḥ |
apye̍ṣāṁ̐ stha̱pati̍rha̱taḥ |
ṛ̱ṣi̍rbo̱dhaḥ prabo̍dha̱ssvapno̍ māta̱riśva̎ |
te te̎ prā̱ṇānthspa̍ri̱ṣyanti̱ mā bhai̍ṣī̱rna ma̍ri̱ṣyasi̍ |
ja̱gdho maśa̍ko ja̱gdhā vitṛ̍ṣṭi̱rja̱gdho vya̍dhva̱rassvāhā̎ |
ja̱gdho vya̍dhva̱ro ja̱gdho maśa̍ko ja̱gdhā vitṛ̍ṣṭi̱ssvāhā̎
ja̱gdhā vitṛ̍ṣṭi̱rja̱gdho vya̍dhva̱ro ja̱gdho maśa̍ka̱ssvāhā̎ || 16 ||
sṛ̱ja̱cchadu̱bhe a̱ṣṭau ca̍ || 16 ||))

[[2-17]]

इन्द्र॑ जहि॒ दन्द॒शूकं॑ प॒क्षिणं॒ यस्स॑रीसृ॒पः ।
दं॒क्ष्यन्तं॑ च द॒शन्तं॑ च॒ सर्वा॒ꣳस्तानि॑न्द्र जम्भय॒ स्वाहा॑ ।
अ॒प्सु जा॑त॒ सरे॑ वृद्ध दे॒वाना॒मपि॑ हस्त्य ।
त्वम॑ग्न इन्द्रप्रे॑षित॒स्स नो॒ मा हिꣳसी॒स्स्वाहा॑ ।
त्राण॑मसि परि॒त्राण॑मसि परि॒धिर॑सि ।
अन्ने॑न मनु॒ष्याꣳ॑ स्त्रायसे॒ तृणैः॑ प॒शून्गर्ते॑न स॒र्पान् य॒ज्ञेन॑ दे॒वान्थ्स्व॒धया॑ पि॒तॄन्थ्स्वाहा॑ ।
तथ्स॒त्यं यत्ते॑ऽमावा॒स्या॑यां च पौर्ण॑मा॒स्यां च॒ विष॑ब॒लिꣳ॑ हर॑न्ति॒ सर्वे॑ उद॒रस॒र्पिणः॑ ।
तत्ते॒ प्रेर॑ते॒ त्वयि॒ संवि॑शन्ति॒ त्वयि॑ नस्स॒तस्त्वयि॑ स॒द्भ्यो व॒र्षाभ्यो॑ न॒ः परि॑देहि ।
नमो॑ अस्तु स॒र्पेभ्य॒ इति॑ ति॒स्रः ।
नमो॑ अस्तु स॒र्पेभ्यो॒ ये पार्थि॑वा॒ य आ॑न्तरि॒क्ष्या॑ ये दि॒व्या॑ ये दि॒श्या॑ः ।

तेभ्य इमं बलिꣳ हरिष्यामि तेभ्य इमं बलिमहार्षम्।
तक्षक वैशालेय धृतराष्ट्रैरावतस्ते जीवास्त्वयि नस्सतस्त्वयि सद्भ्यो वर्षाभ्यो नः परिदेहि।
धृतराष्ट्रैरावत तक्षकस्ते वैशालेयो जीवास्त्वयि नस्सतस्त्वयि सद्भ्यो वर्षाभ्यो नः परिदेहि।
अहिꣳसाऽतिबलस्ते जिवास्त्वयि नस्सतस्त्वयि सद्भ्यो वर्षाभ्यो नः परिदेहि।
अतिबलाऽहिꣳसस्ते जिवास्त्वयि नस्सतस्त्वयि सद्भ्यो वर्षाभ्यो नः परिदेहि।
ये दन्दशूकाः पार्थिवास्ताꣳस्त्वमितः परोगव्यूतिं निवेशय।
सन्ति वै नश्शफिनस्सन्ति दण्डिनस्ते वो नेद्धिनसान्न्येद्यूयमस्मान् हिनसात।
समीची नामासि प्राचीदिग्घेतयो नाम स्थेति द्वादश पर्यायाः।
अपश्वेत पदा जहि पूर्वेण चाऽपरेण च।
सप्त च मानुषीरिमास्तिस्रश्च राजबन्धवीः।
न वै श्वेतस्याध्याचारेऽहिर्जघान कंचन।
श्वेताय वैदर्वाय नमो नमश्श्वेताय वैदर्वाय॥ १७॥
दिश्या राजबन्धवीर्द्धे च॥ १७॥

((indra jahi dandaśūkaṃ pakṣiṇaṃ yassarīsṛpaḥ ।
daṃkṣyantaṃ ca daśantaṃ ca sarvāṃstānindra jambhaya svāhā ।
apsu jāta sare vṛddha devānāmapi hastya ।
tvamagna indrapreṣitassa no mā hiṃsīssvāhā ।
trāṇamasi paritrāṇamasi paridhirasi ।
annena manuṣyāṃ strāyase tṛṇaiḥ paśūngartena sarpān yajñena devānthsvadhayā pitṝnthsvāhā ।
tathsatyaṃ yatte'māvāsyāyāṃ ca paurṇamāsyāṃ ca viṣabaliṃ haranti sarva udarasarpiṇaḥ ।
tatte prerate tvayi saṃviśanti tvayi nassatastvayi sadbhyo varṣābhyo naḥ paridehi ।
namo astu sarpebhya iti tisraḥ ।
namo astu sarpebhyo ye pārthivā ya āntarikṣyā ye divyā ye diśyāḥ ।
tebhya imaṃ baliṃ hariṣyāmi tebhya imaṃ balimahārṣam ।
takṣaka vaiśāleya dhṛtarāṣṭrairāvataste jīvāstvayi nassatastvayi sadbhyo varṣābhyo naḥ paridehi ।
dhṛtarāṣṭrairāvata takṣakaste vaiśāleyo jīvāstvayi nassatastvayi sadbhyo varṣābhyo naḥ paridehi ।
ahiṃsā'tibalaste jīvāstvayi nassatastvayi sadbhyo varṣābhyo naḥ paridehi ।
atibalā'hiṃsaste jīvāstvayi nassatastvayi sadbhyo varṣābhyo naḥ paridehi ।
ye dandaśūkāḥ pārthivāstāṃstvamitaḥ parogavyūtiṃ niveśaya ।
santi vai naśśaphinassanti daṇḍinaste vo neddhinasānnyedyūyamasmān hinasāta ।
samīcī nāmāsi prācīdigghetayo nāma stheti dvādaśa paryāyāḥ ।
apaśveta padā jahi pūrveṇa cā'pareṇa ca ।
sapta ca mānuṣīrimāstisraśca rājabandhavīḥ ।
na vai śvetasyādhyācāre'hirjaghāna kaṃcana ।

śve̱tāya̍ vaida̱rvāya̱ namo̱ nama̍śśve̱tāya̍ vaida̱rvāya̍ || 17 ||
di̱śya̍ ra̱jaba̍ndhavī̱rdve ca̍ || 17 ||))

[[2-18]]

परमेष्ठ्यसि परमां मा॑ श्रियं गमय।
प्रत्यवरूढो नो हेमन्तः।
प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु।
प्रति प्रजायां प्रति तिष्ठामि भव्ये।
इह धृतिरिह विधृतिरिह रन्तिरिह रमतिः।
स्योना पृथिवि बडित्था पर्वतानामिति द्वे।
आ त्वा वहन्तु हरयस्सचेतसश्श्वेतैरश्वैस्सह केतुमद्भिः।
वाताजिरैर्मम हव्याय शर्व।
उपस्पृशतु मीढ्वान्मीढुषे स्वाहोपस्पृशतु मीढुषी मीढुष्यै स्वाहा।
जयन्तोपस्पृश जयन्ताय स्वाहा।
भवाय देवाय स्वाहा शर्वाय देवाय स्वाहेशानाय देवाय स्वाहा पशुपतये देवाय स्वाहा रुद्राय देवाय स्वाहोग्राय देवाय स्वाहा भीमाय देवाय स्वाहा महते देवाय स्वाहा।
भवस्य देवस्य पत्न्यै स्वाहा शर्वस्य देवस्य पत्न्यै स्वहेशानस्य देवस्य पत्न्यै स्वाहा पशुपतेर्देवस्य पत्न्यै स्वाहा रुद्रस्य देवस्य पत्न्यै स्वाहोग्रस्य देवस्य पत्न्यै स्वाहा भीमस्य देवस्य पत्न्यै स्वाहा महतो देवस्य पत्न्यै स्वाहा।
जयन्ताय स्वाहा।
अग्नये स्विष्टकृते सुहुतहुत आहुतीनां कामानां॰ समर्धयित्रे स्वाहा।
स्वस्ति नः पूर्णमुखः परिक्रामतु।
गृहपोपस्पृश गृहपाय स्वाहा।
गृहप्युपस्पृश गृहप्यै स्वाहा।
घोषिण उपस्पृशत घोषिभ्यस्स्वाहा।
श्वासिन उपस्पृशत श्वासिभ्यस्स्वाहा।
विचिन्वन्त उपस्पृशत विचिन्वद्भ्यस्स्वाहा।
प्रपुन्वन्त उपस्पृशत प्रपुन्वद्भ्यस्स्वाहा।
समश्नन्त उपस्पृशत समश्नद्भ्यस्स्वाहा।
देवसेना उपस्पृशत देवसेनाभ्यस्स्वाहा।

या आख्याता याश्चानाख्याता देवसेना उपस्पृशत देवसेनाभ्यः स्वाहा ।
द्वारापोपस्पृश द्वारापाय स्वाहा।
द्वाराप्युपस्पृश द्वाराप्यै स्वाहा।
अन्वासारिण उपस्पृशतान्वासारिभ्यः स्वाहा।
निषङ्गिन्नुपस्पृश निषङ्गिणे स्वाहा।
नमो निषङ्गिण इषुधिमते क्षेत्रस्य पतिना वयमिति द्वे॥ १८॥
जयन्ताय स्वाहा विचिन्वद्भ्यस्स्वाहा नव च॥ १८॥

((parameṣṭhyasi paramāṃ māṃ śriyaṃ gamaya |
pratyavarūḍho no hemantaḥ |
prati kṣatre prati tiṣṭhāmi rāṣṭre pratyaśveṣu prati tiṣṭhāmi goṣu |
prati prajāyāṃ prati tiṣṭhāmi bhavye |
iha dhṛtiriha vidhṛtiriha rantiriha ramatiḥ |
syonā pṛthivi baditthā parvatānāmiti dve |
ā tvā vahantu harayassacetasaśśvetairaśvaissaha ketumadbhiḥ |
vātājirairmama havyāya śarva |
upaspṛśatu mīḍhvānmīḍhuṣe svāhopaspṛśatu mīḍhuṣi mīḍhuṣyai svāhā |
jayantopaspṛśa jayantāya svāhā |
bhavāya devāya svāhā śarvāya devāya svāheśānāya devāya svāhā paśupataye devāya svāhā rudrāya devāya svāhogrāya devāya svāhā bhīmāya devāya svāhā mahate devāya svāhā |
bhavasya devasya patnyai svāhā śarvasya devasya patnyai svaheśānasya devasya patnyai svāhā paśupaterdevasya patnyai svāhā rudrasya devasya patnyai svāhograsya devasya patnyai svāhā bhīmasya devasya patnyai svāhā mahato devasya patnyai svāhā |
jayantāya svāhā |
agnaye sviṣṭakṛte suhutahuta āhutīnāṃ kāmānāṃ samardhayitre svāhā |
svasti naḥ pūrṇamukhaḥ parikrāmatu |
gṛhapopaspṛśa gṛhapāya svāhā |
gṛhapyupaspṛśa gṛhapyai svāhā |
ghoṣiṇa upaspṛśata ghoṣibhyassvāhā |
śvāsina upaspṛśata śvāsibhyassvāhā |
vicinvanta upaspṛśata vicinvadbhyassvāhā |
prapunvanta upaspṛśata prapunvadbhyassvāhā |
samaśnanta upaspṛśata samaśnadbhyassvāhā |
devasenā upaspṛśata devasenābhyassvāhā |
yā ākhyātā yāścānākhyātā devasenā upaspṛśata devasenābhyaḥ svāhā |
dvārāpopaspṛśa dvārāpāya svāhā |
dvārāpyupaspṛśa dvārāpyai svāhā |
anvāsāriṇa upaspṛśatānvāsāribhyaḥ svāhā |
niṣaṅginnupaspṛśa niṣaṅgiṇe svāhā |
namo niṣaṅgiṇa iṣudhimate kṣetrasya patinā vayamiti dve || 18 ||

ja̱ya̱ntāya̱ svāhā́ vici̱nvadbhya̱ssvāhā̱ navá ca || 18 ||))

[[2-19]]
यन्मे माता प्रलुलोभ चरत्यननुव्रता।
तन्मे रेतः पिता वृङ्क्तामाभुरण्योऽवपद्यताममुष्मै स्वाहा।
यास्तिष्ठन्ति या धावन्ति या आर्द्रघ्नीः परितस्थुषीः।
अद्भिर्विश्वस्य भर्त्रीभिरन्तरन्यं पितुर्दधेऽमुष्मै स्वाहा।
यन्मे पितामही प्रलुलोभ चरत्यननुव्रता।
तन्मे रेतः पितामहो वृङ्क्तामाभुरण्योऽवपद्यताममुष्मै स्वाहा।
अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या।
आभिर्दिग्भिरनन्ताभिरन्तरन्यं पितामहाद्दधेऽमुष्मै स्वाहा।
यन्मे प्रपितामही प्रलुलोभ चरत्यननुव्रता।
तन्मे रेतः प्रपितामहो वृङ्क्तामाभुरण्योऽवपद्यताममुष्मै स्वाहा।
अन्तर्दध ऋतुभिरहोरात्रैश्च सन्धिभिः।
अर्धमासैश्च मासैश्चान्तरन्यं प्रपितामहाद्दधेऽमुष्मै स्वाहा।
ये चेह पितरो ये चनेह याꣳश्च विद्म याꣳ उ च न प्रविद्म।
अग्ने तान्वेत्थ यदि ते जातवेदस्तया प्रत्तꣳ स्वधयामदन्तु स्वाहा।
स्वाहा पित्रे पित्रे स्वाहा स्वाहा पित्रे पित्रे स्वाहा।
स्वधा स्वाहाऽग्नये कव्यवाहनाय स्वधा स्वाहा।
एष ते तत मधुमाꣳ ऊर्मिस्सरस्वान् यावानग्निश्च पृथिवी च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथाऽग्निरक्षितोऽनुपदस्त एवं मह्यं पित्रेऽक्षितोऽनुपदस्तस्स्वधा भव तां त्वꣳ स्वधां तैस्सहोपजीवर्चस्ते महिमैष ते पितामह मधुमाꣳ ऊर्मिस्सरस्वान् यावान् वायुश्चान्तरिक्षं च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथा वायुरक्षितोऽनुपदस्त एवं मह्यं पितामहायाक्षितोऽनुपदस्तस्स्वधा भव तां त्वꣳ स्वधां तैस्सहोपजीव सामानि ते महिमैष ते प्रपितामह मधुमाꣳ ऊर्मिस्सरस्वान् यावानादित्यश्च द्यौश्च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथाऽऽदित्योऽक्षितोऽनुपदस्त एवं मह्यं प्रपितामहायाक्षितोऽनुपदस्तस्स्वधा भव तां त्वꣳ स्वधां तैस्सहोपजीव यजूꣳषि ते महिमा॥ १९॥
अमुष्मै स्वाहा सप्त च॥ १९॥

((yanmé mā̱tā pralúlobha̱ cara̱tyanánuvratā |

tanme̱ reta̍ḥ pi̱tā vṛ̍ṅktāmā̱bhura̱ṇyo'va̍padyatāma̱muṣmai̱ svāhā̎ |
yāstiṣṭha̍nti̱ yā dhāva̍nti̱ yā ā̎rdro̱ghnīḥ pari̍ta̱sthuṣī̎ḥ |
a̱dbhirviśva̍sya bha̱rtrībhi̍ra̱ntara̱nyaṃ pi̱turda̍dhe̱'muṣmai̱ svāhā̎ |
yanme̍ pitāma̱hī pralu̍lobha̱ cara̱tyana̍nuvratā |
tanme̱ reta̍ḥ pitāma̱ho vṛ̍ṅktāmā̱bhura̱ṇyo'va̍padyatāma̱muṣmai̱ svāhā̎ |
a̱ntarda̍dhe̱ parva̍tairanta̱rmahya̍ pṛ̱thi̱vyā |
ā̱bhirdi̱gbhira̍na̱ntābhi̍ra̱ntara̱nyaṃ pi̍tāma̱hādda̍dhe̱'muṣmai̱ svāhā̎ |
yanme̎ prapitāma̱hī pralu̍lobha̱ cara̱tyana̍nuvratā |
tanme̱ reta̍ḥ prapitāma̱ho vṛ̍ṅktāmā̱bhura̱ṇyo'va̍padyatāma̱muṣmai̱ svāhā̎ |
a̱ntarda̍dha ṛ̱tubhi̍rahorā̱traiśca̍ sa̱ndhibhi̍ḥ |
a̱rdha̱mā̱saiśca̱ māsai̎śca̱ntara̱nyaṃ pra̍pitāma̱hādda̍dhe̱'muṣmai̱ svāhā̎ |
ye ce̱ha pi̱taro̱ ye ca̱neha̱ yāṁśca̍ vi̱dma yām̐ u̍ ca̱ na pra̍vi̱dma |
agne̱ tānve̎ttha̱ yadi̱ te jā̍tavedastayā̎ pra̱ttam̐̎ sva̱dhayā̍madantu̱ svāhā̎ |
svāhā̍ pi̱tre pi̱tre svāhā̱ svāhā̍ pi̱tre pi̱tre svāhā̎ |
sva̱dhā svāhā̱'gnaye̍ kavya̱vāha̍nāya sva̱dhā svāhā̎ |
e̱ṣa te̍ tata̱ madhu̍mām̐ ūrmissara̍svā̱n yāva̍na̱gniśca̍ pṛ̱thi̱vī ca̱ tāva̍tyasya mā̱trā
tāva̍tīṃ ta e̱tāṃ mātrā̍m̐ dadāmi̱ yathā̱'gnirakṣi̱to'nu̍padasta e̱vaṃ mahya̍ṃ
pi̱tre'kṣi̱to'nu̍padastassva̱dhā bhava̱ tāṃ tvam̐̎ sva̱dhāṃ taissa̱hopa̍jīva̱rcaste̍
mahimai̱ṣa te̍ pitāmaha̱ madhu̍mām̐ ūrmissara̍svā̱n yāvā̍n vā̱yuścā̱ntari̍kṣaṃ ca̱
tāva̍tyasya mā̱trā tāva̍tīṃ ta e̱tāṃ mātrā̍m̐ dadāmi̱ yathā̍ vā̱yurakṣi̱to'nu̍padasta
e̱vaṃ mahya̍ṃ pitāma̱hāyākṣi̱to'nu̍padastassva̱dhā bhava̱ tāṃ tvam̐̎ sva̱dhāṃ
taissa̱hopa̍jīva̱ sāmā̍ni te mahimai̱ṣa te̎ prapitāmaha̱ madhu̍mām̐ ūrmissara̍svā̱n
yāva̍nādi̱tyaśca̱ dyauśca̱ tāva̍tyasya mā̱trā tāva̍tīṃ ta e̱tāṃ mātrā̍m̐ dadāmi̱
yathā̍''di̱tyo'kṣi̱to'nu̍padasta e̱vaṃ mahya̍ṃ prapitāma̱hāyākṣi̱to'nu̍padastassva̱dhā
bhava̱ tāṃ tvam̐̎ sva̱dhāṃ taissa̱hopa̍jīva̱ yajūm̐̍ṣi te mahi̱mā || 19 ||
a̱muṣmai̱ svāhā̍ sa̱pta ca̍ || 19 ||))

[[2-20]]

पृ॒थि॒वी ते॒ पात्रं॒ द्यौर॑पि॒धानं॒ ब्रह्म॑णस्त्वा॒ मुखे॑ जुहोमि ब्रा॒ह्म॒णानां॒ त्वा प्राणापा॒नयो॑र्जुहो॒म्यक्षि॑तमसि॒ मैषां॑ क्षेष्ठा अ॒मु॒त्रा॒ऽमुष्मि॑ँल्लो॒के।
मा॒र्जय॑न्तां॒ मम॑ पि॒तरो॑ मा॒र्जय॑न्तां॒ मम॑ पिता॒म॒हा मा॒र्जय॑न्तां॒ मम॑ प्रपिता॒म॒हाः।
मा॒र्जय॑न्तां॒ मम॑ मा॒तरो॑ मा॒र्जय॑न्तां॒ मम॑ पिता॒म॒ह्यो॑ मा॒र्जय॑न्तां॒ मम॑ प्रपिता॒म॒ह्यः।
ए॒तत्ते॑ ततासौ॒ ये च॒ त्वामन्वे॒ तत्ते॑ पितामहासौ॒ ये च॒ त्वामन्वे॒ तत्ते॑ प्रपितामहासौ॒ ये च॒ त्वामनु॒।
ए॒तत्ते॑ मातरसौ॒ याश्च॒ त्वामन्वे॒ तत्ते॑ पितामह्यसौ॒ याश्च॒ त्वामन्वे॒ तत्ते॑ प्रपितामह्यसौ॒ याश्च॒ त्वामनु॒।
मा॒र्जय॑न्तां॒ मम॑ पि॒तर॒ इत्ये॒ते।
ये च॒ वो॑ऽत्र॒ ये चा॒स्मास्वा॒शᳫं सन्ते॒ याश्च॒ वो॑ऽत्र॒ याश्चा॒स्मास्वा॒शᳫं सन्ते॒ ते च॑ वहन्तां॒ ताश्च॑ वहन्तां॒
तृप्य॑न्तु भवन्त॒ स्तृप्य॑न्तु भवत्य॒ स्तृप्य॑त॒ तृप्य॑त॒ तृप्य॑त।
पु॒त्रान्पौत्रा॑न॒भि त॒र्पय॑न्तीरापो॒ मधु॑मतीरि॒माः।
स्व॒धां पि॒तृभ्यो॑ अ॒मृतं॒ दुहा॑ना॒ आपो॑ दे॒वीरु॒भयाᳫंस्तर्पयन्तु।

तृप्य॑त॒ तृप्य॑त॒ तृप्य॑त।
प्रा॒णे निवि॑ष्टो॒ऽमृतं॑ जुहोमि॒ ब्रह्म॑णि म आ॒त्माऽमृ॒त॒त्वाय॑।
यां जना॓ः प्रति॒नन्द॑न्ति॒ रात्रिं॑ धे॒नुमि॑वाय॒तीम्।
सं॒व॒थ्स॒रस्य॒ या पत्नी॒ स नो॑ अस्तु सुमङ्गली स्वाहा॓।
वह॑ व॒पां जा॑तवेदः पि॒तृभ्यो॒ यत्रै॑नान्वेत्थ॒ निहि॑तान्परा॒के।
मेद॑स॒ः कूल्या॒ उप॒ तान्क्ष॑रन्तु स॒त्या ए॑षामा॒शिष॑स्सन्तु॒ कामै॑स्स्वाहा॓।
यां जना॓ः प्रति॒नन्द॒न्तीत्ये॑षा।
इ॒यमे॒व सा या प्र॑थमा व्यौच्छ॒दिति॑ ति॒स्रः।
ए॒का॒ष्ट॒कां प॑श्यत॒ दोह॑माना॒मन्नं॑ मा॒ꣳसव॑द्घृतव॑थ्स्व॒धाव॑त्।
तद्ब्रा॓ह्म॒णैरति॑पूत॒मन॑न्त॒मक्ष॑य्यम॒मुष्मि॑ꣳल्लो॒के स्फीति॑ं गच्छतु मे पि॒तृभ्य॒स्स्वाहा॓।
औ॒लु॒ख॒ला ग्रावा॑णो॒ घोष॑मक्रत ह॒विः कृ॒ण्वन्त॑ः परिव॒थ्सरी॒ण॑म्।
ए॒का॒ष्ट॒के सु॑प्र॒जा वी॒रव॑न्तो व॒यꣳ स्या॑म॒ पत॑यो र॒यी॒णाम्।
ए॒का॒ष्ट॒का तप॑सा॒ तप्य॑माना सं॒व॒थ्स॒रस्य॒ पत्नी॑ दुदुहे॒ प्रपी॑ना।
तं दोह॒मुप॑जीवाथ पि॒तर॑स्सहस्र॑धारम॒मुष्मि॑ꣳल्लो॒के स्वाहा॓॥ २०॥
तृप्य॑त परिव॒थ्स॒रीण॒ं त्रीणि॑ च॥ २०॥

((pṛthịvī tẹ pātrạm dyaurápịdhānạm brahmáṇastvā̱ mukhé juhomi brāhmaṇānā̱ṁ tvā prāṇāpā̱nayŏrjuhọmyakṣịtamasị maiṣā̱ṁ kṣeṣṭhā ạmutrā̱'muṣmiṁ̐lloke |
mā̱rjayántā̱m mamá pịtaró mā̱rjayántā̱m mamá pitāmạhā mā̱rjayántā̱m mamá prapitāmạhāḥ |
mā̱rjayántā̱m mamá mā̱taró mā̱rjayántā̱m mamá pitāmạhyó mā̱rjayántā̱m mamá prapitāmạhyáḥ |
ẹtatté tatāsaụ ye cạ tvāmanvẹ tatté pitāmahāsaụ ye cạ tvāmanvẹ tattĕ prapitāmahāsaụ ye ca tvāmanú |
ẹtatté mātarasaụ yāścạ tvāmanvẹ tatté pitāmahyasaụ yāścạ tvāmanvẹ tattĕ prapitāmahyasaụ yāścạ tvāmanú |
mā̱rjayántā̱m mamá pịtarạ ityẹte |
ye cạ vo'trạ ye cā̱smāsvāśaṁ̐ santẹ yāścạ vo'trạ yāścā̱smāsvāśaṁ̐ santẹ te cá vahantā̱m tāścá vahantā̱m tṛpyántu bhavantạ stṛpyántu bhavatyạ stṛpyátạ tṛpyátạ tṛpyáta |
pụtrānpautrā́nạbhi tạrpayántī̱rāpọ madhúmatī̱rịmāḥ |
svạdhā̱m pịtṛbhyó ạmṛtạm duhā́nā̱ āpó dẹvīrụbhayāṁ̐starpayantu |
tṛpyátạ tṛpyátạ tṛpyátạ |
prā̱ṇe nivíṣṭọ'mṛtaṁ̱ juhomị brahmáṇi ma ā̱tmā'mṛ̱tạtvāyá |
yā̱m janā̐ḥ pratịnandántị rātriṁ̱ dhẹnumivāyạtīm |
sa̱ṁvạthsạrasyạ yā patnī̱ sa nó astu sumaṅgalī svāhā̐ |
vahá vạpā̱m jā́tavedaḥ pịtṛbhyọ yatraịnānvétthạ nihitānparā̱ke |

medȧsaḥ kūlyā̱ upa̱ tānkṣȧrantu sa̱tyā ėṣāmā̱śiṣȧssantu̱ kāmai̱ssvāhā̈ ।
yāṃ̱ janā̈ḥ prati̱nanda̱ntītye̱ṣā ।
i̱yame̱va sā yā prȧthamā̱ vyaucchȧditi̱ ti̱sraḥ ।
e̱kāṣṭa̱kāṃ paśyata̱ dohȧmānā̱mannaṃ mā̱ṃ̈savȧdghṛ̱tavȧthsva̱dhāvȧt ।
tadbrā̈hmaṇairȧtipū̱tamȧna̱ntamȧkṣa̱yyama̱muṣmiṃ̈lllo̱ke sphītiṃ gacchatu me
pi̱tṛbhya̱ssvāhā̈ ।
au̱lūkha̱lā grāvȧṇo̱ ghoṣȧmakra̱ta ha̱viḥ kṛ̱ṇvantȧḥ parivathsa̱rīṇām ।
e̱kāṣṭa̱ke suprajā vī̱ravȧnto va̱yaṃ̈ syȧma̱ patȧyo ra̱yī̱ṇām ।
e̱kāṣṭa̱kā tapȧsā̱ tapyȧmānā saṃvathsa̱rasya̱ patnī duduhe̱ prapīnā ।
taṃ doha̱mupȧjīvātha pi̱tarȧssa̱hasrȧdhārama̱muṣmiṃ̈lllo̱ke svāhā̈ ॥ 20 ॥
tṛpyȧta parivathsa̱rīṇaṃ̱ trīṇi ca ॥ 20 ॥))

[[2-21]]

उ॒क्थ्य॑श्चाऽस्यतिरा॒त्रश्च॑ साद्य॒स्क्रीश्छन्द॑सा स॒ह।
अ॒पू॒प॒घृ॒ताहु॑ते॒ नम॑स्ते अस्तु माꣳ सपि॒प्प॒ले॒ स्वाहा॑।
भूः पृ॑थि॒व्य॑ग्निनर्चाऽमुं मयि॒ काम॒ं नि॒यु॑नज्मि॒ स्वाहा॑।
भुवो॑ वा॒युना॒ऽन्तरि॑क्षेण॒ साम्ना॒ऽमुं मयि॒ काम॒ं नि॒यु॑नज्मि॒ स्वाहा॑।
स्व॑र्दि॒वाऽऽदि॒त्येन॒ यजु॑षा॒ऽमुं मयि॒ काम॒ं नि॒यु॑नज्मि॒ स्वाहा॑।
ज॒नद॒द्भिर॑थर्वाङ्गि॒रोभि॑र॒मुं मयि॒ काम॒ं नि॒यु॑नज्मि॒ स्वाहा॑।
रो॒च॒नाया॑जि॒राया॒ग्नये॑ दे॒वजा॑तवे॒ स्वाहा॑।
के॒तवे॒ मन॑वे ब्रह्म॑णे दे॒वजा॑तवे॒ स्वाहा॑।
स्व॒धा स्वाहा॒ऽग्नये॑ कव्यवाह॑नाय स्व॒धा स्वाहा॑।
अन्न॑मिव ते दृ॒शे भू॑यास॒ं वस्त्र॑मिव ते दृ॒शे भू॑यास॒ं वित्त॑मिव ते दृ॒शे भू॑यास मा॒शेव॑ ते दृ॒शे भू॑यासꣳ
श्र॒द्धेव॑ ते दृ॒शे भू॑यासम्।
सꣳ स्र॑वन्तु॒ दिशो॑ म॒हीस्समाधा॑वन्तु सू॒नृता॑ः।
सर्वे॑ कामा॑ अ॒भिय॑न्तु मा प्रि॒या अ॒भिर॑क्षन्तु मा प्रि॒याः।
यशो॑ऽसि॒ यशो॒ऽहं त्वयि॑ भूयासमसौ।
अ॒ङ्क्षौ न्य॒ङ्क्षावभि॒त इ॒त्येषा।
अध्व॑नामध्वपते स्व॒स्ति मा॒ संपा॑रय।
अ॒यं वा॑म॒श्विनौ॒ रथो॒ मा दुः॒खे मा सु॒खे रि॑षत्।
अरि॑ष्टस्स्व॒स्ति ग॑च्छतु विवि॒घ्नन्पृत॑नाय॒तः।
अश्वो॑सि॒ हयो॒स्यत्यो॑सि॒ नरो॒स्यर्वा॑ऽसि॒ सप्ति॑रसि वा॒ज्य॑सि॒ वृषा॑ऽसि नृ॒मणा॑ असि॒
ययु॒र्नामा॑स्याऽऽदि॒त्यानां॒ पत्वा॒ऽन्वि॑हि।

ह॒स्ति॒य॒श॒सम॑सि हस्तियश॒सी भू॑यास॒ं वह॑ काल॒वह॒ श्रिय॑ं मा॒ऽभिव॑ह।
इन्द्र॑स्य त्वा॒ वज्रे॑णा॒भि निद॑धाम्यसौ।
अव॑ जिह्वक निजिह्व॒काव॑ त्वा ह॒विषा॑ यजे।
तथ्स॒त्यं यद॒हं ब्रवी॒म्यध॑रो॒ मद॒सौ व॑दा॒थ्स्वाहा॑।
आ ते॒ वाच॑मा॒स्यां॑ दद॒ आ म॑न॒स्या॑ꣳ हृद॑या॒दधि॑।
यत्र॑यत्र ते॒ वाङ्नि॑हिता॒ तां त॒ आद॑दे।
तथ्स॒त्यं यद॒हं ब्रवी॒म्यध॑रो॒ मत्प॑द्यस्वासौ॥ २१॥
भू॒या॒स॒म॒सौ॒ पञ्च॑ च॥ २१॥

((u̱kthyȧścā'syatirā̱traścȧ sādya̱skrīśchandȧsā sa̱ha ।
a̱pū̱pa̱ghṛ̱tāhȧte̱ namȧste astu mām̐ sapi̱ppale̱ svāhā̈ ।
bhūḥ̱ pṛ̍thi̱vyȧgnina̱rcā'mum̱ mayi̱ kāmam̱ niyȧnajmi̱ svāhā̈ ।
bhuvȯ vā̱yunā̱'ntarȧkṣe̱ṇa̱ sāmnā̱'mum̱ mayi̱ kāmam̱ niyȧnajmi̱ svāhā̈ ।
svȧrdivȧ''di̱tyena̱ yajȧṣā̱'mum̱ mayi̱ kāmam̱ niyȧnajmi̱ svāhā̈ ।
ja̱nada̱dbhirathȧrvāṅgi̱robhȧra̱mum̱ mayi̱ kāmam̱ niyȧnajmi̱ svāhā̈ ।
ro̱ca̱nāyȧji̱rāyā̱gnayė de̱vajȧtave̱ svāhā̈ ।
ke̱tave̱ manȧve̱ brahmȧṇe de̱vajȧtave̱ svāhā̈ ।
sva̱dhā svāhā̱'gnayė kavya̱vāhȧnāya sva̱dhā svāhā̈ ।
annȧmiva te dṛ̱śe bhȧyāsam̱ vastrȧmiva te dṛ̱śe bhȧyāsam̱ vittȧmiva te dṛ̱śe bhȧyāsa
mā̱śevȧ te dṛ̱śe bhȧyāsam̐̈ śra̱ddhevȧ te dṛ̱śe bhȧyāsam ।
sam̐̈ srȧvantu̱ diśȯ ma̱hīssamādhȧvantu sū̱nṛtā̈ḥ ।
sarve̱ kāmȧ a̱bhiyȧntu mā pri̱yā a̱bhirȧkṣantu mā pri̱yāḥ ।
yaśȯ'si̱ yaśo̱'ham̱ tvayȧ bhūyāsamasau ।
a̱ṅkau nya̱ṅkāva̱bhita̱ itye̱ṣā ।
adhvȧnāmadhvapate sva̱sti mā̱ sam̱pȧraya ।
a̱yam̱ vȧma̱śvinau̱ ratho̱ mā du̱ḥkhe mā su̱khe rȧṣat ।
arȧṣṭassva̱sti gȧcchatu̱ vivi̱ghnanpṛ̱tanāya̱taḥ ।
aśvȯsi̱ hayo̱syatyȯsi̱ naro̱syarvȧ'si̱ saptȧrasi vā̱jyȧsi̱ vṛ̱ṣȧ'si nṛ̱mana̱ȧ asi̱
yayu̱rnāmȧsyā''di̱tyānām̱ patvā'nvȧhi ।
ha̱sti̱ya̱śa̱samȧsi hastiyaśa̱sī bhȧyāsam̱ vahȧ kāla̱vaha̱ śriyam̱ mā̱'bhivȧha ।
indrȧsya tvā̱ vajrė̱ṇā̱bhi nidȧdhāmyasau ।
avȧ jihvaka nijihva̱kāvȧ tvā ha̱viṣȧ yaje ।
tathsa̱tyam̱ yada̱ham̱ bravī̱myadhȧro̱ mada̱sau vȧdā̱thsvāhā̈ ।
ā te̱ vācȧmā̱syām̐̈ dada̱ ā mȧna̱syām̐ hṛdȧyā̱dadhȧ ।
yatrȧyatra te̱ vāṅnihȧtā̱ tām̱ ta̱ ādȧde ।
tathsa̱tyam̱ yada̱ham̱ bravī̱myadhȧro̱ matpȧdyasvāsau ॥ 21 ॥
bhū̱yā̱sa̱ma̱sa̱u pañcȧ ca ॥ 21 ॥))

[[2-22]]
या त॑ ए॒षा र॑रा॒ट्या॑ त॒नूर्म॒न्योर्मृ॒ध्रस्य॒ नाशि॑नी।

तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः।
यत्त एतन्मुखेऽमतꣳ रराटमुदिव विध्यति।
वि ते क्रोधं नयामसि गर्भमश्वतर्या इव।
अव ज्यामिव धन्वनो हृदो मन्युं तनोमि ते।
इन्द्रापास्य फलिगमन्येभ्यः पुरुषेभ्योऽन्यत्र मत्।
यदहं धनेन प्रपणꣳश्चरामि धनेन देवा धनमिच्छमानः।
तस्मिन्थ्सोमो रुचमादधात्वग्निरिन्द्रो बृहस्पतिश्च स्वाहा।
परि त्वा गिरेरमिहं परि भ्रातुः परिष्वसुः।
परि सर्वेभ्यो ज्ञातिभ्यः परिषीतः क्वेष्यसि।
शश्वत्परिकुपितेन संक्रामेणाऽविच्छिदा।
उलेन परिषीतोसि परिषीतोस्युलेन।
आवर्तन वर्तयेत्येषा।
आवर्तने निवर्तन आवर्तन निवर्तनाय स्वाहा।
अनु पोऽह्वदनुह्वयो निवर्तो वो न्यवीवृतत्।
ऐन्द्रः परिक्रोशो वः परिक्रोशतु सर्वतः।
यदिमामति मन्याध्वा अदेवा देववत्तरम्।
इन्द्रः पाशेन सित्त्वा वो मह्यमिद्वशमानयाथ्स्वाहा।
यदि वृक्षाद्यद्यन्तरिक्षात्फलमभ्यपतत्तदु वायुरेव।
यत्रास्पृक्षत्तनुवं यत्र वास आपो बाधन्तां निर्ऋतिं पराचैः।
ये पक्षिणः पतयन्ति बिभ्यतो निर्ऋतैस्सह।
ते मा शिवेन शग्मेन तेजसोन्दन्तु वर्चसा।
दिवो नु मा बृहतो अन्तरिक्षादपाꣳ स्तोको अभ्यपतच्छिवेन।
समहमिन्द्रियेण मनसाऽसमागां ब्रह्मणा संपृञ्चानस्सुकृता कृतेन।
इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि प्रजापते।
संराजं च व्याहृतीर्विहृताः।
इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्धमेतम्।
शतं जीवन्तु शरदः पुरूचीस्तिरो मृत्युं दधतां पर्वतेन॥ २२॥
क्वेष्यसि पराचैरष्टौ च॥ २२॥

उ॒ष्णेन॒ पञ्च॑दशायु॒र्दा॑ द्वावि॑ꣳशतिराग॒न्त्रा द्वाद॑श॒ योगे॑योगे॒ चतु॒र्द॑श सु॒श्रव॑स्सुश्रव॑स॒न्नव॒ परि॑
त्वैक॑विꣳशतिरि॒मꣳ स्तोम॑मायु॒ष्य॑मेका॒न्नवि॑ꣳशति॒रेका॒न्नवि॑ꣳशति॒र्मयि॑ षोड॑श त्र॒य्यै वि॒द्यायै॑ धा॒ता
द॑दातु न॒स्सप्त॒द॑शसप्तदश दि॒वस्परीति॑ विꣳश॒तिर्मा॑ ते॑ कु॒मार॒न्त्रयो॑विꣳशति॒र्नक्त॒ञ्चारि॑णः॒ पञ्च॑द॒श
यद्भू॒मेरेका॒न्नत्रि॒ꣳ॒शत् कूर्कु॒रोऽष्टावि॑ꣳशति॒रिन्द्र॑ ज॒हि॒ द्वावि॑ꣳशति पर॒मेष्ठ्य॑सि॒
पर॒मामेका॒न्नत्रि॒ꣳ॒शद्यन्मे॑ माता स॒प्तद॑श पृथि॒वी ते॒ त्रयो॑विꣳशतिरु॒क्थ्य॑श्च॒ पञ्च॑विꣳशति॒र्या॑ त॑
ए॒षाऽष्टावि॑ꣳशति॒र्द्वावि॑ꣳशतिः ॥ २२ ॥

उ॒ष्णेन॑ धा॒तोक्थ्य॑श्च॒ द्वावि॑ꣳशतिः ॥ २२ ॥

उ॒ष्णेन॑ दधता॒ं पर्व॑तेन ॥

((yā ta̍ e̱ṣā ra̍rā̱ṭya̍ ta̱nūrma̱nyormṛ̱dhrasya̱ nāśi̍nī |
tāṃ de̱vā bra̍hmacā̱riṇo̱ vina̍yantu sume̱dhasa̍ḥ |
yatta̍ e̱tanmukhe̍'ma̱tam̐ ra̱rā̱ṭa̱mudi̍va̱ vidhya̍ti |
vi te̱ krodhaṃ̍ nayāmasi̱ garbha̍maśvata̱ryā i̍va |
ava̍ jyāmiva̱ dhanva̍no hṛ̱do ma̱nyuṃ ta̍nomi te |
indrāpā̎sya phali̱gama̱nyebhya̱ḥ puru̍ṣebhyo̱'nyatra̱ mat |
yada̱haṃ dhane̍na̱ prapa̱ṇam̐̎ścarā̍mi̱ dhane̍na devā̱ dhana̍mi̱cchamā̍naḥ |
tasmi̱nthsomo̱ ruca̱mādā̍dhātva̱gnirindro̱ bṛha̱spati̍śca̱ svāhā̎ |
pari̍ tvā̱ gire̍rami̱haṃ pari̱ bhrātu̱ḥ pari̱ṣvasu̍ḥ |
pari̱ sarve̎bhyo̱ jñā̱tibhya̱ḥ pari̍ṣīta̱ḥ kve̎ṣyasi̍ |
śaśva̱tpari̍kupitena̱ saṃkrā̍meṇā'vi̱cchidā̎ |
u̱lena̱ pari̍ṣītosi̱ pari̍ṣītosyu̱lena̍ |
āva̍rtana varta̱yetye̱ṣā |
ā̱va̍rtane ni̱varta̍na ā̱varta̍na nivarta̱nāya̱ svāhā̎ |
anu̍ po'hvadanu̍hvayo̱ niva̍rto vo̱ nyavi̍vṛtat |
ai̱ndraḥ pari̍krośo va̱ḥ pari̍krośatu sa̱rvata̍ḥ |
yadi̱māmati̱ manyā̎dhvā adevā de̱vava̍ttaram |
indra̱ḥ pāśe̍na si̱ktvā vo̱ mahya̱midvaśa̱mānayā̱thsvāhā̎ |
yadi̍ vṛ̱kṣādyadya̱ntari̍kṣātphala̍ma̱bhyapa̍ta̱ttadu̍ vā̱yure̱va |
yatrāspṛ̱kṣatta̱nuva̱ṃ yatra̱ vāsa̱ āpo̍ bādhantā̱ṃ nirṛ̍tiṃ parā̱caiḥ |
ye pa̱kṣiṇa̍ḥ pa̱taya̍nti bibhya̍to̱ nirṛ̍taissa̱ha |
te ma̍ śi̱vena̍ śa̱gmena̱ teja̍sondantu̱ varca̍sā |
di̱vo nu ma̍ bṛ̱ha̱to a̱ntari̍kṣāda̱pām̱̐ stoko̍ a̱bhyapa̍tacchi̱vena̍ |
sama̱hami̱ndri̱ye̱ṇa̱ mana̍sā'samāgā̱ṃ brahma̍ṇā sa̱mpṛñcā̱nassu̱kṛta̍ kṛ̱tena̍ |
i̱maṃ me̍ varuṇa̱ tattva̍ yāmi̱ tvaṃ no̍ agne̱ sa tvaṃ no̍ agne̱ tvama̍gne a̱yā'si̱
prajā̍pate |
sa̱mrāja̱ṃ ca̱ vyāhṛ̍tī̱rvihṛ̍tāḥ |
i̱maṃ jī̱vebhya̱ḥ pari̱dhiṃ da̍dhāmi̱ maiṣā̱ṃ nu̍ gā̱dapa̍ro̱ ardha̍me̱tam |
śa̱taṃ ji̍vantu śa̱rada̍ḥ puru̱cīsti̱ro mṛ̱tyuṃ da̍dhatā̱ṃ parva̍tena || 22 ||
kve̎ṣyasi̍ parā̱cairaṣ̱ṭau ca̍ || 22 ||

u̱ṣṇena̱ pañca̍daśāyu̱rdā dvāvim̐śatirāga̱ntrā dvāda̍śa̱ yoge̍yoge̱ catu̍rdaśa su̱śrava̍ssu̱śrava̍sa̱nnava̱ pari̱ tvaika̍vim̐śatiri̱mam̐̐ stoma̍māyu̱ṣya̍mekā̱nnavim̐śati̱rekā̱nnavim̐śati̱rmayi̱ ṣoḍa̍śa tra̱yyai vi̱dyāyai̍ dhā̱tā da̍dātu nassa̱ptada̍śasaptadaśa di̱vasparīti̍ vim̐śa̱tirmā te̍ kumā̱rantrayo̍vim̐śatirnaktañcā̱riṇa̱ḥ pañca̍daśa̱ yadbhūme̱rekā̱nnatri̱m̱̐śat kū̎rku̱ro'ṣṭāvim̐śati̱rindra̍ jahi̱ dvāvim̐śati parame̱ṣṭhyasi̍ para̱māmekā̱nnatri̱m̱̐śadyanme̍ mā̱tā sa̱ptada̍śa pṛthi̱vī te̱ trayo̍vim̐śatiru̱kthya̍śca̱ pañca̍vim̐śati̱ryā ta̍ e̱ṣā'ṣṭāvim̐śati̱rdvāvim̐śatiḥ || 22 ||

u̱ṣṇena̍ dhā̱tokthya̍śca̱ dvāvim̐śatiḥ || 22 ||

u̱ṣṇena̍ dadhatā̱m parva̍tena ||))